वस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं। तत्त्वमसीति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति। नैष दोषः। हेयोपादेयशून्यब्रह्मात्मावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः। देवतादिप्रतिपादनस्य तु स्ववेदान्तवाक्यगतोपासनार्थत्वेऽपि न कश्चिद् विरोधः। न तु तथा ब्रह्मण उपासनाविधिशेषत्वं सम्भवति। एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः। न हि ब्रह्मैकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनःसम्भवोऽस्ति येनोपासनाविधिशेषत्वम् ब्रह्म प्रतिपद्येत। यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टं तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वान् न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यम् प्रत्याख्यातुं। न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं निदर्शनमपेक्षेत। तस्मात् सिद्धम् ब्रह्मणः शास्त्रप्रमाणकत्वम्॥ अत्रापरे प्रत्यवतिष्ठन्ते। यद्यपि शास्त्रप्रमाणकम् ब्रह्म तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते तद्वत्। कुत एतत्। प्रवृत्तिनिवृत्तिप्रयोजनत्वाच् छास्त्रस्य। तथाहि शास्त्रतात्पर्यविद आहुः। दृष्टो हि तस्यार्थः कर्मावबोधनं। चोदनेति क्रियायाः प्रवर्त्तकं वचनं। तस्य ज्ञानमुपदेशः। तद्भूतानां क्रियार्थेन समाम्नायः। आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति च। अतः पुरुषं क्वचिद् विषयविशेषे

प्रवर्त्तयत् कुतश्चिद् विषयविशेषान् निवर्त्तयच् चार्थवच्छास्त्रं।
तच्छेषतया चान्यदुपयुक्तं। तत्सामान्याद् वेदान्तानामपि तथै-
वार्थवत्त्वं स्यात्। सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहो-
त्रादिसाधनं विधीयते एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति
युक्तं। नन्विह जिज्ञास्य वैलक्षण्यमुक्तं। कर्मकाण्डे भव्यो धर्मो जि-
ज्ञास्यः। इह तु भूतं नित्यनिर्वृत्तम् ब्रह्म जिज्ञास्यमिति। तत्र धर्मज्ञा-
नफलादनुष्ठानापेक्षाद् विलक्षणम् ब्रह्मज्ञानफलम् भवितुमर्हति।
नार्हत्येवम् भवितुं। कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमान-
त्वात्। आत्मा वा अरे द्रष्टव्यः। य आत्मा ऽपहतपाप्मा सो ऽन्वेष्टव्यः
स विजिज्ञासितव्यः। आत्मेत्येवोपासीत। आत्मानमेव लोकमुपासीत।
ब्रह्मवेद् ब्रह्मैव भवतीत्यादिषु हि विधानेषु सत्सु को ऽसावात्मा
ब्रह्मेत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः नित्यः
सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमा-
नन्दम् ब्रह्मेत्येवमादयः। तदुपासनाच् च शास्त्रदृष्टो ऽदृष्टो मोक्षः
फलम् भविष्यति। कर्तव्यविध्यननुप्रवेशे तु वस्तुमात्रकथने हानो-
पादानासम्भवात् सप्तद्वीपा वसुमती राजासौ गच्छतीत्यादिवाक्यवद्
वेदान्तवाक्यानामानर्थक्यमेव स्यात्। ननु वस्तुमात्रकथने ऽपि रज्जु-
रियं नायं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं तथेहा-
प्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्।
स्यादेवं यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः संसारित्वभ्रान्तिर् ब्रह्म-

स्वरूपश्रवणमात्रेण निवर्त्तेत न तु निवर्त्तते । श्रुतब्रह्मणोऽपि यथा पूर्वं सुखदुःखादिसंसारित्वधर्मदर्शनात् । श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति च श्रवणोत्तरकालयोर् मनननिदिध्यासनयोर् दर्शनात् । तस्मात् प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकम् ब्रह्माभ्युपगन्तव्यमिति । अत्राभिधीयते । न । कर्मब्रह्मविद्याफलयोर् वैलक्षण्यात् । शारीरं वाचिकम् मानसं च कर्म श्रुतिस्मृतिप्रसिद्धं धर्माख्यं यद्विषया जिज्ञासा अथातो धर्मजिज्ञासेति सूत्रिता । अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज् जिज्ञास्यः परिहाराय । तयोश्चोदनालक्षणयोर् अर्थानर्थयोर् धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे । मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते । ततश्च तद्धेतोर् धर्मस्य तारतम्यं गम्यते । धर्मतारतम्यादधिकारितारतम्यम् । प्रसिद्धं चार्थित्वसामर्थ्यविद्वत्त्वादिकृतमधिकारितारतम्यम् । तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनं । केवलैरिष्टापूर्त्तदत्तसाधनैर् धूमादिक्रमेण दक्षिणेन पथा गमनम् । तत्रापि सुखतारतम्यं तत् साधनतारतम्यं च शास्त्राद् यावत् सम्पातमुषित्वेत्यस्माद् गम्यते । तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते

॥ वे । प्र । प्र । भा ॥

तारतम्येन वर्त्तमानः । तथोर्द्ध्वङ्गतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात् तद्धेतोरधर्म्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते । एवमविद्यादि दोषवतां धर्म्माधर्म्मतारतम्यनिमित्तं शरीरोपादानपूर्व्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धं । तथा च श्रुतिः । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति यथा वर्णितं संसाररूपमनुवदति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति प्रियाप्रियस्पर्शनप्रतिषेधाच् चोदनालक्षणधर्म्मकार्य्यत्वम् मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते । धर्म्मकार्य्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते । अशरीरत्वमेव धर्म्मकार्य्यमिति चेन् न । तस्य स्वाभाविकत्वात् । अशरीरं शरीरेषु अनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानम् मत्वा धीरो न शोचति । अप्राणो ह्यमनाः शुभ्रः असङ्गो ह्ययम् पुरुष इत्यादि श्रुतिभ्यः । अत एवानुष्ठेय फलविलक्षणम् मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धं । तत्र किञ्चित् परिणामि नित्यं स्याद् यथा यस्मिन् विक्रियमाणेऽपि तदेवेदमिति बुद्धिर् न विहन्यते । यथा पृथिव्यादिजगन् नित्यत्ववादिनां यथा च सांख्यानां गुणाः । इदं तु पारमार्थिकं कूटस्थं नित्यं व्योमवत् सर्व्वव्यापि सर्व्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयंज्योतिःस्वभावं । यत्र धर्म्माधर्म्मौ सह कार्य्येण कालत्रयं च नोपावर्त्तेते तदशरीरम् मोक्षाख्यम् । अन्यत्र धर्म्माद्

अन्यत्राधर्माद् अन्यत्रास्मात् कृताकृतादन्यत्र भूताच् च भव्याच् चेत्यादि श्रुतिभ्यः। अतस्तद् ब्रह्म यस्येयं जिज्ञासा प्रस्तुता। तद् यदि कर्त्तव्यशेषत्वेनोपदिश्येत तेन च कर्त्तव्येन साध्यश्चेन् मोक्षोऽभ्युपगम्येत अनित्य एव स्यात्। तत्रैवं सति यथोक्त-कर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः सर्वैर् मोक्षवादिभिरभ्युपगम्यते। अतो न कर्त्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः। अपि च। ब्रह्मविद् ब्रह्मैव भवति। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे। आनन्दम् ब्रह्मणो विद्वान् न बिभेति कुतश्चन। अभयं वै जनक प्राप्तोऽसि। तदात्मानमेवावेद् अहम् ब्रह्मास्मीति तस्मात् तत् सर्वमभवत्। तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्येवमा-द्याः श्रुतयो ब्रह्मविद्यानन्तरम् मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वार-यन्ति। तथा तद्धैतत् पश्यन्नृषिर् वामदेवः प्रतिपेदेऽहम् मनुरभवं सूर्यश्चेति ब्रह्मदर्शनसर्वात्मभवयोर् मध्ये कर्तव्यान्तरवारणायोद-हार्यम्। यथा तिष्ठन् गायतीति तिष्ठति गायत्योर् मध्ये तत् कर्तृकं कार्यान्तरं नास्तीति गम्यते। त्वं हि नः पिता योऽस्माकमविद्यायाः परम्पारन्तारयसि। श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्म-विदिति। सोऽहम् भगवः शोचामि तन् मा भगवाञ्छोकस्य पा-रन्तारयत्विति तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्ति-

मात्रमेवात्मज्ञानस्य फलं दर्शयन्ति । तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रं । दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनन्तरापायादपवर्ग इति । मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद् भवति । न चेदम् ब्रह्मात्मैकत्वविज्ञानं सम्पद्रूपं । यथा अनन्तं वै मनोऽनन्ता वै विश्वेदेवा अनन्तमेव स तेन लोकं जयतीति । न चाध्यासरूपं यथा मनो ब्रह्मेत्युपासीत । आदित्यो ब्रह्मेत्यादेश इति मन आदित्यादिषु ब्रह्म दृष्ट्यध्यासः । नापि विशिष्टक्रियायोगनिमित्तं । वायुर् वाव संवर्गः प्राणो वाव संवर्गः इत्यादिवत् । नाप्याज्यावेक्षणवत् कर्माङ्गसंस्काररूपं । सम्पदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने तत्त्वमस्यहम् ब्रह्मास्म्ययमात्मा ब्रह्मेत्येवमादीनां वाक्यानाम् ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत । भिद्यते हृदयग्रन्थिश् छिद्यन्ते सर्वसंशया इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन् । ब्रह्म वेद ब्रह्मैव भवतीति चैवमादीनि तद्भावापत्तिवचनानि सम्पदादिपक्षे न सामञ्जस्येनोपपद्येरन् । तस्मान् न सम्पदादिरूपम् ब्रह्मात्मैकत्वविज्ञानम् । अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रैव । एवम्भूतस्य च ब्रह्मणस्तज्ज्ञानस्य वा न कयाचिद् युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुं । न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः । अन्यदेव तद् विदितादथो अविदितादधीति विदिक्रियाकर्मत्वप्रतिषेधात् । येनेदं

सर्वं विजानाति तं केन विजानीयादिति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति। यद् वाचानभ्युदितं येन वागभ्युद्यते इत्याद्यविषयत्वम् ब्रह्मण उपन्यस्य तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति। अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेन् न। अविद्याकल्पितभेदनिवृत्तिपरत्वाच् छास्त्रस्य। न हि शास्त्रमिदं तया विषयभूतम् ब्रह्म प्रतिपिपादयिषति किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति। तथा च शास्त्रं। यस्यामतं तस्य मतम् मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानतां। न दृष्टेर् द्रष्टारम् पश्येर् न श्रुतेः श्रोतारं शृणुयाः न विज्ञातेर् विज्ञातारं विजानीया इति चैवमादि। अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान् न मोक्षस्यानित्यत्वदोषः। यस्य तूत्पाद्यो मोक्षस्तस्य वाचिकम् मानसं कायिकं वा कार्यमपेक्षत इति युक्तं तथा विकार्यत्वे च। तयोः पक्षयोर् मोक्षस्य ध्रुवमनित्यत्वं न हि दध्यादिविकार्यम् उत्पाद्यं वा घटादि नित्यं दृष्टं लोके। न चाप्यत्वेनापि कार्यापेक्षा स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणोऽनाप्यत्वं। सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मण आकाशस्येव। नापि संस्कार्यो मोक्षो येन व्यापारमपेक्षते। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद् दोषापनयनेन वा। न तावद् गुणाधानेन सम्भवति। अनाधेयातिशयब्रह्मस्वरूपत्वान्

मोक्षस्य । नापि दोषापनयनेन । नित्यशुद्धब्रह्मस्वरूपत्वान् मोक्षस्य । स्वात्मधर्म एव सन् तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते । यथा आदर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वधर्म इति चेन् न । क्रियाश्रयत्वानुपपत्तेरात्मनः । यदाश्रया हि क्रिया तमविकुर्वती नैवात्मानं लभते । यद्यात्मा क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत । अविकार्योऽयमुच्यत इति चैवमादीनि वाक्यानि बाध्येरन् । तच् चानिष्टं । तस्मान् न स्वाश्रया क्रिया आत्मनः सम्भवति । अन्याश्रयायास्तु क्रियाया अविषयत्वान् न तयात्मा संस्क्रियेत । ननु देहाश्रयया स्नानाचमनयज्ञोपवीतधारणादिकया क्रियया देही संस्क्रियमाणो दृष्टः । न देहसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात् । प्रत्यक्षं हि स्नानाचमनादेर् देहसमवायित्वं । तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तं । यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलमहमरोग इति यत्र बुद्धिरुत्पद्यते एवं स्नानाचमनयज्ञोपवीतादिधारणादिकया क्रिययाहं शुद्धः संस्कृत इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते । स च देहेन संहत एव । तेनैव ह्यहं कर्त्राहम् प्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते । तत् फलं च स एवाश्नाति । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति मन्त्रवर्णात् । आत्मेन्द्रियमनोयुक्तम् भोक्तेत्याहुर् मनीषिण इति च ।

तथा एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति । सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति चैतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः । ब्रह्मभावश्च मोक्षः । तस्मान् न संस्कार्यो ऽपि मोक्षः । अतो ऽन्यन्मोक्षम् प्रतिक्रियानुप्रवेशद्वारं न शक्यं केनचिद् दर्शयितुं । तस्माज् ज्ञानमेकम् मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते । ननु ज्ञानं नाम मानसी क्रिया । न । वैलक्षण्यात् क्रिया हि नाम सा यत्र वस्तु स्वरूपनिरपेक्षैव चोद्यते पुरुषचित्त-व्यापाराधीना च । यथा यस्यै देवतायै हविर् गृहीतं स्यात् तां ध्यायेद् वषट्करिष्यन्निति । सन्ध्याम् मनसा ध्यायेद् इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसं तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं पुरुषतन्त्रत्वात् । ज्ञानं तु प्रमाणजन्यम् । प्रमाणं तु यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुं न शक्यं केवलं वस्तुतन्त्रमेव । तन् न चोदनातन्त्रं । नापि पुरुषतन्त्रं । तस्मान् मानसत्वे ऽपि ज्ञानस्य महद् वैलक्षण्यं । यथा वा पुरुषो वाव गौतमाग्निरित्यत्र योषित् पुरुषयोरग्निबुद्धिर् मानसी भवति केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च । या तु प्रसिद्धे ऽग्नावग्निबुद्धिर् न सा चोदनातन्त्रा नापि पुरुषतन्त्रा किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेव

तन् न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यं। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रं। तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात् कुण्ठी भवन्ति उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्। अहेयानुपादेयवस्तुविषयत्वात्। किमर्थानि तर्ह्यात्मा वा अरे द्रष्टव्य इत्यादीनि विधिच्छायानि वचनानि। स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः इष्टम् मे भूयादनिष्टं मे मा भूदिति न च तत्रात्यन्तिकम् पुरुषार्थं लभते। तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविकात् कार्यकरणसंघातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्त्यात्मा वा अरे द्रष्टव्य इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते। इदं सर्वं यदयमात्मा। यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कम् पश्येत् केन कं विजानीयात्। विज्ञातारमरे केन विजानीयादयमात्मा ब्रह्मेत्येवमादिभिः। यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति तत् तथैवाभ्युपगम्यते। अलङ्कारो ह्ययमस्माकं यद् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति। तथा च श्रुतिः। आत्मानं चेद् विजानीयादयमस्मीति पुरुषः किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेदिति। एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति च स्मृतिः। तस्मान् न प्रतिपत्तिविधि-

॥ वे । प्र । प्र । भा ॥

विषयतया ब्रह्मणः समर्पणं । यदपि केचिदाहुः । प्रवृत्ति-
निवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो
नास्तीति । तन् न । औपनिषदस्य पुरुषस्यानन्यशेषत्वात् ।
यो ऽसावुपनिषत्स्वेवाधिगतः पुरुषो ऽसंसारी ब्रह्मोत्पाद्यादि-
चतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थो ऽनन्यशेषो नासौ नास्ति
नाधिगम्यत इति वा शक्यं वदितुं । स एष नेति नेत्यात्मेत्या-
त्मशब्दात् । आत्मनश्च प्रत्याख्यातुमशक्यत्वात् । नन्वा-
त्माहम् प्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुप-
पन्नं । न तत्साक्षित्वेन प्रत्युक्तत्वात् । न ह्यहम् प्रत्ययवि-
षयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थ एकः समः कूटस्थ
नित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्व-
स्यात्मा अतः स न केनचित् प्रत्याख्यातुं शक्यो विधिशेषत्वं वा
नेतुं । य एव निराकर्ता तस्यैव आत्मत्वप्रसङ्गात् । आत्मत्वा-
देव च सर्वेषां न हेयो नाप्युपादेयः । सर्वं हि विनश्यद् विका-
रजातम् पुरुषान्तं विनश्यति । पुरुषो हि विनाशहेत्वभावाद-
विनाशी विक्रियाहेत्वभावाच् च कूटस्थनित्यः अत एव नित्य-
शुद्धबुद्धमुक्तस्वभावः । तस्मात् पुरुषान् न परं किंचित् सा काष्ठा सा
परा गतिः तं त्वौपनिषदम् पुरुषम् पृच्छामीति चौपनिषदत्वविशेषणम्
पुरुषस्योपनिषत्स्वेव प्राधान्येन प्रकाशमानत्वादुपपद्यते ।
अतो वस्तु परो वेदभागो नास्तीति वचनं साहसमात्रं । यदपि

शास्त्रतात्पर्यविदामनुक्रमणं । दृष्टो हि तस्यार्थः कर्मावबोधनमित्येवमादि । तद् धर्मजिज्ञासाविषयत्वाद् विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम् । अपि च आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्येतदेकान्तेनाभ्युपगच्छताम् भूतोपदेशानामानर्थक्यप्रसङ्गः । प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेद् वस्तूपदिशति भव्यार्थत्वेन कूटस्थं नित्यम् भूतं नोपदिशतीति को हेतुः । न हि भूतमुपदिश्यमानं क्रिया भवति । अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेश इति चेन् नैषदोषः । क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव । क्रियार्थत्वं तु प्रयोजनं तस्य न चैतावता वस्त्वनुपदिष्टम् भवति । यदि नामोपदिष्टं किं तवतेन स्यादिति उच्यते । अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति । तदवगत्या मिथ्याज्ञानस्य संसारहेतोर् निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन । अपि च ब्राह्मणो नहन्तव्य इति चैवमाद्यानिवृत्तिरुपदिश्यते । न च सा क्रिया नापि क्रियासाधनम् । अक्रियार्थानामुपदेशोऽनर्थकश्चेद् ब्राह्मणो न हन्तव्य इत्यादिनिवृत्त्युपदेशानामानर्थक्यम् प्राप्तं तच् चानिष्टं । न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण । नञश्चैष स्वभावो यत् स्वसम्बन्धिनोऽभावम् बोधयति ।

अभावबुद्धिस्तौदासीन्यकारणं । सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति । तस्मात् प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव ब्राह्मणो न हन्तव्य इत्यादिषु प्रतिषेधार्थम् मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः । तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम् । यदप्युक्तं कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् सप्तद्वीपा वसुमतीत्यादिवदिति । तत् परिहृतं । रज्जुरियं नायं सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात् । ननु श्रुतब्रह्मणोऽपि यथा पूर्वं संसारित्वप्रदर्शनात् न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम् । अत्रोच्यते । नावगतब्रह्मात्मभावस्य यथा पूर्वं संसारित्वं शक्यं दर्शयितुम् । ब्रह्मात्मभावविरोधात् । न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वम् भवतीति शक्यं कल्पयितुं । न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखम् भवति । न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानहीनस्य तदेव कुण्डलित्वनिमित्तं सुखम् भवति । तदुक्तं श्रुत्या । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति । शरीरे पतितेऽशरीरत्वं

स्यान् न जीवत इति चेत्। न। सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। न ह्यात्मनः शरीरात्माभिमानलक्षणम् मिथ्याज्ञानम् मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुं। नित्यमशरीरत्वम् अकर्मनिमित्तत्वादिति चावोचाम। तत् कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत्। न। शरीरसम्बन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गात्। अन्धपरम्परैषाऽनादित्वकल्पना क्रियासमवायाभावाच् चात्मनः कर्तृत्वानुपपत्तेः। सन्निधिमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेत् न। धनदानाद्युपार्जितभृत्यसम्बन्धित्वात् तेषां कर्तृत्वोपपत्तेः। न त्वात्मनो धनदानादिवच् छरीरादिभिः स्वस्वामिसम्बन्धनिमित्तं किंचिच् छक्यं कल्पयितुम्। मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धे हेतुः। एतेन यजमानत्वमात्मनो व्याख्यातम्। अत्राहुः देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणो न मिथ्येति। न। प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः यथा केशरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः सम्पन्नः सिद्धः तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः नाप्रसिद्धवस्तुभेदस्य। तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ। यथा मन्दान्धकारे

स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ ।
यथा वा शुक्तिकायामकस्माद् रजतमिदमिति निश्चितौ शब्दप्रत्य-
यौ तद्वद् देहादिसंघाते ऽहमिति निरुपचारेण शब्दप्रत्ययावा-
त्मानात्माविवेकिन उत्पद्यमानौ कथं गौणौ शक्यौ कल्पयितुं ।
आत्मानात्मविवेकिनामपि पण्डितानामजाऽविपालानामिवाऽ
विविक्तौ शब्दप्रत्ययौ भवतः । तस्माद् देहादिव्यतिरिक्तात्मास्ति-
त्ववादिनां देहादावहम् प्रत्ययो मिथ्यैव न गौणः । तस्मान् मिथ्या
प्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरी-
रत्वं । तथा च ब्रह्मविद्विषया श्रुतिः । तद् यथाहिनिर्ल्वयनी
वल्मीके ऽमृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमश-
रीरोऽमृतः प्राणो ब्रह्मैव तेज एवेति । सचक्षुरचक्षुरिव सकर्णोऽ
कर्ण इव सवागवागिव समना अमन इव सप्राणोऽप्राण इवेति च ।
स्मृतिरपि स्थितप्रज्ञस्य का भाषेत्याद्या स्थितप्रज्ञस्य लक्षणान्या-
चक्षाणा विदुषः सर्वप्रवृत्त्यसम्बन्धं दर्शयति । तस्मान् नावग-
तब्रह्मात्मभावस्य यथा पूर्वं संसारित्वं । यस्य तु यथा पूर्वं संसा-
रित्वं नासाववगतब्रह्मात्मभाव इत्यनवद्यं । यत् पुनरुक्तं श्रवणात्
पराचीनयोर् मनननिदिध्यासनयोर् दर्शनाद् विधिशेषत्वम् ब्रह्म-
णो न स्वरूपपर्यवसायित्वमिति तन् न श्रवणवद् अवगत्यर्थत्वात्
मनननिदिध्यासनयोः यदि ह्यवगतम् ब्रह्मान्यत्र विनियुज्येत भ-
वेत् तदा विधिशेषत्वं न तु तदस्ति मनननिदिध्यासनयोरपि

॥ वे । प्र । प्र । भा ॥

श्रवणवदवगत्यर्थत्वात् । तस्मान् न प्रतिपत्तिविधिशेषतया शास्त्रप्रमाणकत्वम् ब्रह्मणः सम्भवतीति । अतः स्वतन्त्रमेव ब्रह्मशास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम् । एवं च सत्यथातो ब्रह्मजिज्ञासेति शास्त्रारम्भ उपपद्यते । प्रतिपत्तिविधिपरत्वे ह्यथातो धर्मजिज्ञासेत्येवारब्धत्वान् न पृथक् शास्त्रमारभ्येत । आरभ्यमाणं चैवमारभ्येत । अथातः परिशिष्टधर्मजिज्ञासेति अथातः क्रत्वर्थपुरुषार्थयोर् जिज्ञासेतिवत् । ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भोऽथातो ब्रह्मजिज्ञासेति । तस्मादहम् ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि । न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि प्रमाणानि च भवितुमर्हन्तीति । अपि चाहुः । गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् । सद्ब्रह्मात्माहमित्येवम् बोधे कार्यं कथम् भवेत् । अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः । अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः । देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदम् प्रमाणं त्वात्मनिश्चयादिति ॥ चतुःसूत्री समाप्ता ॥

एवं तावद् वेदान्तवाक्यानाम् ब्रह्मात्मावगतिप्रयोजनानां तात्पर्येण समन्वितानामन्तरेणापि कार्यानुप्रवेशम् ब्रह्मणि पर्यवसानमुक्तम् । ब्रह्म च सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थिति-

लयकारणमित्युक्तं । सांख्यादयस्तु परिनिष्ठितं वस्तु प्रमाणान्तरगम्यमेवेति मन्यमानाः प्रधानादीनि कारणान्तराण्यनुमिमानास्तत्परतयैव वेदान्तवाक्यानि योजयन्ति । सर्वेष्वेव तु वेदान्तवाक्येषु सृष्टिविषयेष्वनुमानेनैव कार्येण कारणं लिलक्षयिषितम् । प्रधानपुरुषसंयोगा नित्यानुमेया इति साङ्ख्या मन्यन्ते । काणादास्त्वेतेभ्य एव वाक्येभ्य ईश्वरं निमित्तकारणमनुमिमते । अणूंश्च समवायिकारणम् । एवमन्येऽपि तार्किका वाक्याभासयुक्त्याभासावष्टम्भाः पूर्वपक्षवादिन इहोत्तिष्ठन्ते । तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानाम् ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्ते । तत्र साङ्ख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति मन्यमाना आहुः । यानि वेदान्तवाक्यानि सर्वज्ञस्य सर्वशक्तेर् ब्रह्मणो जगत्कारणत्वं प्रदर्शयन्तीत्यवोचः तानि प्रधानकारणपक्षेऽपि योजयितुं शक्यन्ते । सर्वशक्तित्वं तावत् प्रधानस्यापि स्वविकारविषयमुपपद्यते एवं सर्वज्ञत्वमप्युपपद्यते कथं । यत् त्वं ज्ञानम् मन्यसे सत्त्वधर्मः सः सत्त्वात् संजायते ज्ञानमिति स्मृतेः । तेन च सत्त्वधर्मेण ज्ञानेन कार्यकरणवन्तः पुरुषाः सर्वज्ञा योगिनः प्रसिद्धाः । सत्त्वस्य हि निरतिशयोत्कर्षे सर्वज्ञत्वम् प्रसिद्धं । न च केवलस्याकार्यकरणस्य पुरुषस्योपलब्धिमात्रस्य सर्वज्ञत्वं किंचिज्ज्ञत्वं वा

कल्पयितुं शक्यं। त्रिगुणत्वात् तु प्रधानस्य सर्वज्ञानकारणभूतं सत्त्वं प्रधानावस्थायामपि विद्यत इति प्रधानस्याचेतनस्यैव सतः सर्वज्ञत्वमुपचर्यते वेदान्तेषु। अवश्यं च त्वयापि सर्वज्ञम् ब्रह्माभ्युपगच्छता सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमभ्युपगन्तव्यं। न हि सर्वविषयं ज्ञानं कुर्वदेव ब्रह्म वर्त्तते। तथाहि ज्ञानस्य नित्यत्वे ज्ञानक्रियाम् प्रति स्वातन्त्र्यम् ब्रह्मणो हीयते। अथानित्यं तदिति ज्ञानक्रियाया उपरमे उपरमेतापि ब्रह्म तदा सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमापतति। अपि च प्रागुत्पत्तेः सर्वकारकशून्यम् ब्रह्मेष्यते त्वया न च ज्ञानसाधनानां शरीरेन्द्रियादीनामभावे ज्ञानोत्पत्तिः कस्यचिदुपपन्ना। अपि च प्रधानस्यानेकात्मकस्य परिणामसम्भवात् कारणत्वोपपत्तिः मृदादिवत् नासंहतस्यैकात्मकस्य ब्रह्मण इति एवम् प्राप्ते इदं सूत्रमारभ्यते॥

॥ ईक्षतेर् नाशब्दम्॥ ५॥

न सांख्यपरिकल्पितमचेतनम् प्रधानं जगतः कारणं शक्यं वेदान्तेष्वाश्रयितुम्। अशब्दं हि तत् कथमशब्दम् ईक्षतेर् ईक्षितृत्वश्रवणात् कारणस्य कथम् एवं हि श्रूयते सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तद् ऐक्षत बहु स्याम् प्रजायेयेति तत् तेजोऽसृजतेति। तत्रेदं शब्दवाच्यं नामरूप-

॥ वे । प्र । प्र । भा ॥

व्याकृतं जगत् प्रागुत्पत्तेः सदात्मनावधार्य तस्यैव प्रकृतस्य सच्छब्दवाच्यस्येक्षणपूर्वकं तेजःप्रभृतेः स्रष्टृत्वं दर्शयति । तथा चान्यत्र आत्मा वा इदमेकमेवाग्र आसीन्नान्यत् किंचनमिषत् स ईक्षत लोकान् नु सृजा इति स इमान् लोकानसृजतेति ईक्षापूर्विकामेव सृष्टिमाचष्टे । क्वचिच् षोडशकलम् पुरुषम् प्रस्तुत्याह । स ईक्षां चक्रे स प्राणमसृजतेति ईक्षापूर्विकामेव सृष्टिमाचष्टे ईक्षतेरिति च धात्वर्थनिर्देशोऽभिप्रेतः यजतेरितिवन् न धातुनिर्देशः तेन यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपस्तस्मादेतद् ब्रह्म नामरूपमन्नं च जायत इत्येवमादीन्यपि सर्वज्ञेश्वरकारणपराणि वाक्यानि उदाहर्तव्यानि । यत् तूक्तं सत्त्वधर्मेण ज्ञानेन सर्वज्ञम् प्रधानम् भविष्यतीति तत् नोपपद्यते न हि प्रधानावस्थायां गुणसाम्यात् सत्त्वधर्मं ज्ञानं सम्भवति । ननूक्तं सर्वज्ञानशक्तिमत्त्वेन सर्वज्ञम् भविष्यतीति । तदपि नोपपद्यते यदि गुणसाम्ये सति सत्त्वव्यपाश्रयां ज्ञानशक्तिमाश्रित्य सर्वज्ञम् प्रधानमुच्येत तर्हि कामं रजस्तमोव्यपाश्रयामपि ज्ञानप्रतिबन्धशक्तिमाश्रित्य किंचिज्ज्ञत्वमुच्येत । अपि च नासाक्षिका सत्त्वप्रवृत्तिर् जानाति नाभिधीयते । न चाचेतनस्य प्रधानस्य साक्षित्वमस्ति तस्मादनुपपन्नम् प्रधानस्य सर्वज्ञत्वं । योगिनां तु चेतनत्वात् सत्त्वोत्कर्षनिमित्तं सर्वज्ञत्वमुपपन्नमित्यनुदाहरणम् । अथ पुनः साक्षिनिमित्तम्

ईक्षितृत्वम् प्रधानस्य कल्प्येत यथाग्निनिमित्तमयःपिण्डादेर् दग्धृत्वं
तथा सति यन्निमित्तमीक्षितृत्वम् प्रधानस्य तदेव सर्वज्ञम् मुख्यम् ब्रह्म
जगतः कारणमिति युक्तं। यत् पुनरुक्तम् ब्रह्मणोऽपि न मुख्यं सर्वज्ञ-
त्वमुपपद्यते नित्यज्ञानक्रियत्वे ज्ञानक्रियाम् प्रति स्वातन्त्र्यासम्भवाद्
इति। अत्रोच्यते इदं तावद् भवान् प्रष्टव्यः कथं नित्यज्ञानक्रियत्वे सर्व-
ज्ञत्वहानिरिति। यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति
सोऽसर्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य कदाचिज्
जानाति कदाचिन् न जानाति इत्यसर्वज्ञत्वमपि स्यात् नासौ ज्ञाननित्य-
त्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानक्रियाम् प्रति स्वातन्त्र्यव्यपदेशो
नोपपद्यते इति चेन् न। प्रततौष्ण्यप्रकाशेऽपि सवितरि दहति प्रकाश-
यतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितुर् दाह्यप्रकाश्यसंयोगे
सति दहति प्रकाशयतीति व्यपदेशः स्यात् न तु ब्रह्मणः प्रागुत्पत्तेर्
ज्ञानकर्मसंयोगोऽस्तीति विषमो दृष्टान्तः। न। असत्यपि कर्मणि सवि-
ता प्रकाशत इति कर्तृत्वव्यपदेशदर्शनाद् एवमसत्यपि ज्ञानकर्मणि
ब्रह्मणस्तदैक्षतेति कर्तृत्वव्यपदेशोपपत्तेर् न वैषम्यं। कर्मापेक्षायां
तु ब्रह्मण ईक्षितृत्वश्रुतयः सुतरामुपपन्नाः किम् पुनस्तत् कर्म यत्
प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति तत्त्वान्यत्वाभ्यामनिर्वचनीये
नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः। यत् प्रसादाद्धि योगि-
नामप्यतीतानागतविषयम् प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः
किमु वक्तव्यं तस्य नित्यसिद्धस्येश्वरस्य सृष्टिस्थितिसंहृति-

विषयं नित्यं ज्ञानम् भवतीति। यदप्युक्तम् प्रागुत्पत्तेर् ब्रह्मणः शरीरादिसम्बन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति न तच् चोद्यमवतरति सवितृप्रकाशवद् ब्रह्मणो ज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि च अविद्यादिमतः संसारिणः शरीराद्यपेक्षाज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य। मन्त्रौ चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर् विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यम् पुरुषम् महान्तमिति च। ननु नास्ति तव ज्ञानप्रतिबन्धकारणवानीश्वरादन्यः संसारी। नान्योऽतोऽस्ति द्रष्टेति विज्ञातेति श्रुतेः तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षाज्ञानोत्पत्तिर् नेश्वरस्येति। अत्रोच्यते सत्यं नेश्वरादन्यः संसारी तथापि देहादिसंघातोपाधिसम्बन्ध इष्यत एव घटकरकगिरिगुहाद्युपाधिसम्बन्ध इव व्योम्नः तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टो घटच्छिद्रं करकच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि तत्कृता चाकाशे घटाकाशादिभेदमिथ्याबुद्धिर् दृष्टा तथेहापि देहादिसंघातोपाधिसम्बन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः दृश्यते चात्मन एव सतो देहादिसंघातेऽनात्मन्यात्मत्वाभिनिवेशो मिथ्या-

बुद्धिमात्रेण पूर्वेण सति चैवं संसारित्वे देहाद्यपेक्षमीक्षितृत्वमुपपन्नं संसारिणः । यदप्युक्तम् प्रधानस्यानेकात्मकत्वान् मृदादिवत् कारणत्वोपपत्तिः नासंहतस्य ब्रह्मण इति तत् प्रधानस्याशब्दत्वेनैव प्रत्युक्तं यथा तु तर्केणापि ब्रह्मण एव कारणत्वं निर्वोढुं शक्यते न प्रधानादीनां तथा प्रपंचयिष्यति न विलक्षणत्वादस्येत्येवमादिना ॥

अत्राह यदुक्तं नाचेतनम् प्रधानं जगत्कारणमीक्षितृत्वश्रवणाद् इति तदन्यथाप्युपपद्यते ऽचेतने ऽपि चेतनवदुपचारदर्शनात् प्रत्यासन्नपतनतां कूलस्यालक्ष्य कूलम् पिपतिषतीत्यचेतने ऽपि कूले चेतनवदुपचारो दृष्टः तद्वद्चेतने ऽपि प्रधाने प्रत्यासन्नसर्गे चेतनवदुपचारो भविष्यति तदैक्षतेति यथा लोके कश्चिच् चेतनः स्नात्वा भुक्त्वा चापराह्णे ग्रामं रथेन गमिष्यामीति ईक्षित्वा अनन्तरन्तथैव नियमेन प्रवर्तते तथा प्रधानमपि महदाद्याकारेण नियमेन प्रवर्तते तस्माच् चेतनवदुपचर्यते कस्मात् पुनः कारणाद् विहाय मुख्यम् ईक्षितृत्वमौपचारिकं कल्प्यते । तत् तेज ऐक्षत ता आप ऐक्षन्तेति चाचेतनयोरप्तेजसोश्चेतनवदुपचारदर्शनात् । तस्मात् सत्कर्तृकमपीक्षणमौपचारिकमिति गम्यते । उपचारप्राये वचनादित्येवम् प्राप्ते इदं सूत्रमारभ्यते ॥

॥ गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

यदुक्तं प्रधानमचेतनं सच्छब्दवाच्यं तस्मिन्नौपचारिक ईक्ष-
तिरप्तेजसोरिवेति तदसत्। कस्मात्। आत्मशब्दात्। सदेव
सोम्येदमग्र आसीदित्युपक्रम्य तदैक्षत तत् तेजोऽसृजतेति
च तेजोऽबन्नानां सृष्टिमुक्त्वा तदेव प्रकृतं सदीक्षितृ तानि
च तेजोऽबन्नानि देवताशब्देन परामृश्याह सेयं देवतैक्षत हन्ता-
हमिमास् तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे
व्याकरवाणीति तत्र यदि प्रधानमचेतनं गुणवृत्त्येक्षितृ कल्प्येत
तदेव प्रकृतत्वात् सेयं देवतेति परामृश्येत न तदा देवताजीवमा-
त्मशब्देनाभिदध्यात् जीवो हि नाम चेतनः शरीराध्यक्षः प्राणा-
नां धारयिता तत्प्रसिद्धेर् निर्वचनाच् च स कथमचेतनस्य प्रधा-
नस्यात्मा भवेद् आत्मा हि नाम स्वरूपं नाचेतनस्य प्रधानस्य
चेतनो जीवः स्वरूपम् भवितुमर्हति। अत्र तु चेतनम् ब्रह्म
मुख्यमीक्षितृ परिगृह्यते तस्य जीवविषय आत्मशब्दप्रयोग उप-
पद्यते तथा स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा
तत् त्वमसि श्वेतकेतो इत्यत्र स आत्मेति प्रकृतं सदणिमानमात्म-
शब्देनोपदिश्य तत् त्वमसि श्वेतकेतो इति चेतनस्य श्वेतकेतोरात्मत्वेनोप-
दिशति अप्तेजसोस् तु विषयत्वादचेतनत्वं नामरूपव्याकरणादौ
च प्रयोज्यत्वेनैव निर्देशात् न चात्मशब्दवत् किंचित् मुख्यत्वे

कारणमस्तीति युक्तं कृत्वात् गौणत्वमीक्षितृत्वस्य । तयोरपि च सदधिष्ठितत्वापेक्षमेवेक्षितृत्वं । सतस्त्वात्मशब्दान्न गौणमीक्षितृत्वमित्युक्तम् । अथोच्येत अचेतनेऽपि प्रधाने भवत्यात्मशब्दः आत्मनः सर्वार्थकारित्वाद् यथा राज्ञः सर्वार्थकारिणि भृत्ये भवत्यात्मशब्दः ममात्मा भद्रसेन इति । प्रधानं हि पुरुषस्यात्मनो भोगापवर्गौ कुर्वदुपकरोति राज्ञः इव भृत्यः सन्धिविग्रहादिषु वर्त्तमानः । अथ वैक एवात्मशब्दश्चेतनाचेतनविषयो भविष्यति भूतात्मेन्द्रियात्मेति च प्रयोगदर्शनाद् यथैक एव ज्योतिःशब्दः क्रतुज्वलनविषयः तत्र कुत एतद् आत्मशब्दादीक्षतेरगौणत्वमित्यत उत्तरम् पठति ॥

॥ तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

न प्रधानमचेतनमात्मशब्दालम्बनम् भवितुमर्हति स आत्मेति प्रकृतं सदणिमानमादाय तत् त्वमसि श्वेतकेतो इति चेतनस्य श्वेतकेतोः मोक्षयितव्यस्य तन्निष्ठामुपदिश्य आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति मोक्षोपदेशात् । यदि ह्यचेतनम् प्रधानं सच्छब्दवाच्यं तदसीति ग्राहयेन् मुमुक्षुं चेतनं सन्तमचेतनोऽसीति तदा विपरीतवादि-शास्त्रम् पुरुषस्यानर्थायेत्यप्रमाणं स्यात् न तु निर्दोषं शास्त्रमप्रमाणं कल्पयितुं युक्तं । यदि चाज्ञस्य सतो मुमुक्षोरचेतनमनात्म-

नमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रं मतश्रद्दधानतयान्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत् तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत तथा सति पुरुषार्थाद् विहन्येतानर्थं च ऋच्छेत् । तस्माद् यथा स्वर्गाद्यर्थिनोऽग्निहोत्रादिसाधनं यथा भूतमुपदिशति तथा मुमुक्षोरपि स आत्मा तत् त्वमसि श्वेतकेतो इति यथा भूतमेवात्मानमुपदिशतीति युक्तम् एवं च सति तप्तपरशुग्रहणमोक्षदृष्टान्तेन सत्याभिसन्धस्य मोक्षोपदेश उपपद्यते । अन्यथा ह्यमुख्ये सदात्मतत्त्वोपदेशेऽहमुक्थमस्मीति विद्यादितिवत् सम्पन्मात्रमिदमनित्यफलं स्यात् तत्र मोक्षोपदेशो नोपपद्येत तस्मान्न सदणिमन्यात्मशब्दस्य गौणत्वम् । भृत्ये तु स्वामिभृत्यभेदस्य प्रत्यक्षत्वादुपपन्नो गौण आत्मशब्दो ममात्मा भद्रसेन इति । अपि च क्वचिद् गौणशब्दो दृष्ट इति नैतावता शब्दप्रमाणकेऽर्थे गौणीकल्पना न्याय्या सर्वत्र । अनाश्वासप्रसङ्गात् । यत् तूक्तं चेतनाचेतनयोः साधारण आत्मशब्दः क्रतुज्वलनयोरिव ज्योतिःशब्द इति तन्न अनेकार्थत्वस्यान्याय्यत्वात् । तस्माच् चेतनविषय एव मुख्य आत्मशब्दश्चेतनत्वोपचाराद् भूतादिषु प्रयुज्यते भूतात्मेन्द्रियात्मेति च । साधारणत्वेऽप्यात्मशब्दस्य न प्रकरणमुपपदं वा किञ्चिन्निश्चायकमन्तरेणान्यतरवृत्तिता निर्धारयितुं शक्यते न चात्राचेतनस्य निश्चायकं किञ्चित् कारणमस्ति प्रकृतं तु सदीक्षितृ सन्निहितश्च चेतनः श्वेतकेतुः । न हि चेतनस्य श्वेतकेतोरचेतन आत्मा सम्भवतीत्यवोचाम ।

तस्माच् चेतनविषय एवात्मशब्द इति निश्चीयते। ज्योतिःशब्दोऽपि लौकिकेन प्रयोगेन ज्वलन एव रूढः अर्थवादप्रकल्पितेन तु ज्वलनसादृश्येन क्रतौ प्रवृत्त इत्यदृष्टान्तः। अथ वा पूर्वसूत्र एवात्मशब्दं निरस्तसमस्तगौणत्वसाधारणत्वाशङ्कतया व्याख्याय ततः स्वतन्त्र एव प्रधानकारणनिराकरणे हेतुर् व्याख्येयः तन्निष्ठस्य मोक्षोपदेशादिति। तस्मान् नाचेतनम् प्रधानं सच्छब्दवाच्यं॥ कुतश्च न प्रधानं सच्छब्दवाच्यम्॥

॥ हेयत्वावचनाच् च ॥ ८॥

यद्यनात्मैव प्रधानं सच्छब्दवाच्यं स आत्मा तत् त्वमसीति इहोपदिष्टं स्यात् स तदुपदेशश्रवणादनात्मज्ञतया तन्निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षुस् तस्य हेयत्वम् ब्रूयाद् यथाऽरुन्धतीं दिदर्शयिषुः तत्समीपस्थां स्थूलान्ताराममुख्याम् प्रथममरुन्धतीति ग्राहयित्वा ताम् प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति तद्वन्नायमात्मेति ब्रूयान् न चैवमवोचत् सन्मात्रात्मावगतिनिष्ठैव हि षष्ठप्रपाठकपरिसमाप्तिर् दृश्यते। चशब्दः प्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थः। सत्यपि हेयत्ववचने प्रतिज्ञाविरोधः प्रसज्येत कारणविज्ञानाद्धि सर्वं विज्ञातमिति प्रतिज्ञातम् उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतम् भवत्यमतम् मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो

काठकोपनिषत्

काठकोपनिषत्

ओं तत् सत्

नमो वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च

शान्तिः शान्तिः शान्तिः हरिः ओं

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ ।
तस्य ह नचिकेता नाम पुत्र आस ।
तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धा''विवेश सोऽमन्यत
पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः ।
अनन्दा नाम ते लोकास् तान् स गच्छति ता ददत् ।
स हो'वाच पितरं तात कस्मै मां दास्यसी'ति द्वितीयं तृतीयं
तं हो'वाच मृत्यवे त्वा ददामी'ति
बहूनाम् एमि प्रथमो बहूनाम् एमि मध्यमः ।
किंस्विद् यमस्य कर्तव्यं यन् मया'द्य करिष्यति ।
अनुपश्य यथा पूर्वे प्रतिपश्य तथा'परे ।
सस्यम् इव मर्त्यः पच्यते सस्यम् इवा''जायते पुनः ।
वैश्वानरः प्रविशत्य् अतिथिर् ब्राह्मणो गृहान् ।

तस्यै ऽतां शान्तिं कुर्वन्ति हर वैवस्वतो ऽदकम् ।
आशाप्रतीक्षे सङ्गतं सूनृतां चे ऽष्टापूर्ते पुत्रपशूंस् च सर्वान् ।
एतद् वृङ्क्ते पुरुषस्या ऽल्पमेधसो यस्या ऽनश्नन् वसति ब्राह्मणो गृहे।
तिस्रो रात्रीर् यद् अवात्सीर् गृहे मे ऽनश्नन् ब्रह्मन्न् अतिथिर् नमस्यः।
नमस् ते ऽस्तु ब्रह्मन् स्वस्ति मे ऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व।
शान्तसङ्कल्पः सुमना यथा स्याद् वीतमन्युर् गौतमो मा ऽभि मृत्यो ।
त्वत्प्रसृष्टम् मा ऽभिवदेत् प्रतीत एतत् त्रयाणाम् प्रथमं वरं वृणे ।
यथा पुरस्ताद् भविता प्रतीत औद्दालकिर् आरुणिर् मत्प्रसृष्टः ।
सुखं रात्रीः शयिता वीतमन्युस् त्वां ददृशिवान् मृत्युमुखात् प्रमुक्तम्।
स्वर्गे लोके न भयं किंचना ऽस्ति न तत्र त्वं न जरया बिभेति ।
उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके ।
स त्वम् अग्निं स्वर्ग्यम् अध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वम् भजन्त एतद् द्वितीयेन वृणे वरेण ।
प्र ते ब्रवीमि तद् उ मे निबोध स्वर्ग्यम् अग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिम् अथो प्रतिष्ठां विद्धि त्वम् एनं निहितं गुहायाम् ।
लोकादिम् अग्निं तम् उवाच तस्मै या इष्टका यावतीर् वा यथा वा ।

काठ॰ १॰

स चा'पि तत् प्रत्यवदद् यथो'क्तम् अथा'स्य मृत्युः पुनर् आह तुष्टः।
तम् अब्रवीत् प्रीयमाणो महात्मा वरं तवे'हा'द्य ददामि भूयः।
तवै'व नाम्ना भविता'यम् अग्निः सृङ्कां चे'माम् अनेकरूपां गृहाण।
त्रिणाचिकेतस् त्रिभिर् एत्य सन्धिं त्रिकर्मकृत् तरति जन्ममृत्यू।
ब्रह्मजज्ञं देवम् ईड्यं विदित्वा निचाय्ये'मां शान्तिम् अत्यन्तम् एति।
त्रिणाचिकेतस् त्रयम् एतद् विदित्वा य एवं विद्वांश् चिनुते नाचिकेतम्।
स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके।
एष ते'ग्निर् नचिकेतः स्वर्ग्यो'यम् अवृणीथा द्वितीयेन वरेण।
एतम् अग्निं तवै'व प्रवक्ष्यन्ति जनासस् तृतीयं वरं नचिकेतो वृणीष्व।
ये'यम् प्रेते विचिकित्सा मनुष्ये अस्ती'त्य् एके ना'यम् अस्ती'ति चै'के।
एतद् विद्याम् अनुशिष्टस् त्वया'हं वराणाम् एष वरस् तृतीयः।
देवैर् अत्रा'पि विचिकित्सितम् पुरा न हि सुविज्ञेयम् अणुर् एष धर्मः।
अन्यं वरं नचिकेतो वृणीष्व मा मो'परोत्सीर् अति मा सृजै'नम्।
देवैर् अत्रा'पि विचिकित्सितं किल त्वं च मृत्यो यन् न सुविज्ञेयम् आत्थ।
वक्ता चा'स्य त्वादृग् अन्यो न लभ्यो ना'न्यो वरस् तुल्य एतस्य कश्चित्।
शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यम् अश्वान्।

भूमेर् महद् आयतनं वृणीष्व स्वयं च जीव शरदो यावद् इच्छसि ।
एतत् तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च ।
महा भूमौ नचिकेतस् त्वम् एधि कामानां त्वा कामभाजं करोमि ।
ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामान् छन्दत प्रार्थयस्व ।
इमा रामाः सरथाः सतूर्या न ही ऽदृशा लम्भनीया मनुष्यैः ।
आभिर् मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणम् मा ऽनुप्राक्षीः ।
श्वोभावा मर्त्यस्य यद् अन्तके ऽतत् सर्वेन्द्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितम् अल्पम् एव तवै ऽव वाहास् तव नृत्यगीते ।
न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तम् अद्राक्ष्म चेत् त्वा ।
जीविष्यामो यावद् ईशिष्यसि त्वं वरस् तु मे वरणीयः स एव ।
अजीर्यताम् अमृतानाम् उपेत्य जीर्यन् मर्त्यः क्वधःस्थः प्रजानन् ।
अभिध्यायन् वर्णरति प्रमोदान् अतिदीर्घे जीविते को रमेत ।
यस्मिन्न् इदं विचिकित्सन्ति मृत्यो यत् साम्पराये महति ब्रूहि नस् तत् ।
योऽयं वरो गूढम् अनुप्रविष्टो ना ऽन्यं तस्मान् नचिकेता वृणीते ।

॥ इति प्रथमा वल्ली ॥

काठ. २ .

ग्रन्यच् छ्रेयो ऽन्यद् उतै ’व प्रेयस् ते उभे नानार्थे पुरुषं सिनीतः ।
तयोस् श्रेय ग्राददानस्य साधु भवति हीयते ऽर्थाद् य उ प्रेयो वृणीते ।
श्रेयस् च प्रेयस् च मनुष्यम् एतः तौ सम्परीत्य विविनक्ति धीरः ।
श्रेयो हि धीरो ऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ।
स त्वम् प्रियान् प्रियरूपांस् च कामान् ग्रभिध्यायन् नचिकेतो ऽत्यस्राक्षीः ।
नै ’तां सृङ्कां वित्तमयीम् ग्रवाप्तो यस्याम् मज्जन्ति बहवो मनुष्याः ।
दूरम् एते विपरीते विषूची ग्रविद्या या च विद्ये ’ति ज्ञाता ।
विद्याभीप्सिनं नचिकेतसम् मन्ये न त्वा कामा बहवो ’लोलुपन्त ।
ग्रविद्यायाम् ग्रन्तरे वर्तमानाः स्वयं धीराः पण्डिता मन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढा ग्रन्धेनै ’व नीयमाना यथा ’न्धाः ।
न साम्परायः प्रतिभाति बालम् प्रमाद्यन्तं वित्तमोहेन मूढम् ।
ग्रयं लोको ना ’स्ति पर इति मानी पुनः पुनर् वशम् ग्रापद्यते मे ।
श्रवणाया ’पि बहुभिर् यो न लभ्यः शृण्वन्तो ऽपि बहवो यं न विदुः ।
ग्राश्चर्यो ऽस्य वक्ता कुशलो ऽस्य लब्धा ग्राश्चर्यो ज्ञाता कुशलानुशिष्टः ।
न नरेणा ’वरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः ।
ग्रनन्यप्रोक्ते गतिर् ग्रत्र ना ’स्त्य् ग्रणीयान् ह्य् ग्रतर्क्यम् ग्रणु प्रमाणात् ।

काठ. २.

नैषा तर्केण मतिर् आपनेया प्रोक्ता ऽन्येनैव सुज्ञानाय प्रेष्ठ ।
यां त्वम् आपः सत्यधृतिर् बता ऽसि त्वादृङ् नो भूयान् नचिकेतः प्रष्टा ।
जानाम्य् अहं शेवधिर् इत्य् अनित्यं न ह्य् अध्रुवैः प्राप्यते हि ध्रुवं तत् ।
ततो मया नाचिकेतश् चितो ऽग्निर् अनित्यैर् द्रव्यैः प्राप्तवान् अस्मि नित्यम् ।
कामस्या ऽप्तिं जगतः प्रतिष्ठां क्रतोर् अनन्त्यम् अभयस्य पारम् ।
स्तोमम् महद् उरुगायम् प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतो ऽत्यस्राक्षीः ।
तं दुर्दर्शं गूढम् अनुप्रविष्टं गुहाहितं गह्वरेष्ठम् पुराणम् ।
अध्यात्मयोगाधिगमेन देवम् मत्वा धीरो हर्षशोकौ जहाति ।
एतच् छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यम् अणुम् एतम् आप्य ।
स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसम् मन्ये ।
अन्यत्र धर्माद् अन्यत्रा ऽधर्माद् अन्यत्रा ऽस्मात् कृताकृतात् ।
अन्यत्र भूताच् च भव्याच् च यत् तत् पश्यसि तद् वद ।
सर्वे वेदा यत् पदम् आमनन्ति तपांसि सर्वाणि च यद् वदन्ति ।
यद् इच्छन्तो ब्रह्मचर्यं चरन्ति तत् ते पदं सङ्ग्रहेण ब्रवीम्य् ओम् इत्य् एतत् ।
एतद् ध्य् एवा ऽक्षरम् ब्रह्म एतद् ध्य् एवा ऽक्षरम् परम् ।
एतद् ध्य् एवा ऽक्षरं ज्ञात्वा यो यद् इच्छति तस्य तत् ।

काठ. २.

एतद् आलम्बनं श्रेष्ठम् एतद् आलम्बनम् परम् ।
एतद् आलम्बनं ज्ञात्वा ब्रह्मलोके महीयते ।
न जायते म्रियते वा विपश्चिन् ना ऽयं कुतश्चिन् न बभूव कश्चित् ।
अजो नित्यः शाश्वतो ऽयम् पुराणो न हन्यते हन्यमाने शरीरे ।
हन्ता चेन् मन्यते हन्तुं हतश् चेन् मन्यते हतम् ।
उभौ तौ न विजानीतो ना ऽयं हन्ति न हन्यते ।
अणोर् अणीयान् महतो महीयान् आत्मा ऽस्य जन्तोर् निहितो गुहायाम् ।
तम् अक्रतुः पश्यति वीतशोको धातुः प्रसादान् महिमानम् आत्मनः ।
आसीनो दूरं व्रजति शयानो याति सर्वतः ।
कस् तम् मदामदं देवम् मदन्यो ज्ञातुम् अर्हति ।
अशरीरं शरीरेषु अनवस्थेष्व् अवस्थितम् ।
महान्तं विभुम् आत्मानम् मत्वा धीरो न शोचति ।
ना ऽयम् आत्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यम् एवै ऽष वृणुते तेन लभ्यस् तस्यै ऽष आत्मा वृणुते तनूं स्वाम् ।
ना ऽविरतो दुश्चरितान् ना ऽशान्तो ना ऽसमाहितः ।
ना ऽशान्तमनसो वा ऽपि प्रज्ञानेनै ऽनम् आप्नुयात् ।

यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनम्।
मृत्युर् यस्यो ’पसेचनं क इत्था वेद यत्र सः॥
॥ इति द्वितीया वल्ली ॥

ऋतम् पिबन्तौ स्वकृतस्य लोके गुहाम् प्रविष्टौ परमे परार्द्धे।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः।
यः सेतुर् ईजानानाम् अक्षरम् ब्रह्म यत् परम्।
अभयं तितीर्षताम् पारं नाचिकेतं शकेमहि।
आत्मानं रथिनं विद्धि शरीरं रथम् एव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहम् एव च।
इन्द्रियाणि हयान् आहुर् विषयांस् तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तम् भोक्ते ’त्य् आहुर् मनीषिणः।
यस् त्व् अविज्ञानवान् भवत्य् अयुक्तेन मनसा सदा।
तस्ये ’न्द्रियाण्य् अवश्यानि दुष्टाश्वा इव सारथेः।
यस् तु विज्ञानवान् भवति युक्तेन मनसा सदा।

काठ. ३.

तस्ये'न्द्रियाणि वश्यानि सदश्वा इव सारथेः ।
यस् त्व् अविज्ञानवान् भवत्य् अमनस्कः सदा'शुचिः ।
न स तत्पदम् आप्नोति संसारं चा'धिगच्छति ।
यस् तु विज्ञानवान् भवति स मनस्कः सदा शुचिः ।
स तु तत्पदम् आप्नोति यस्माद् भूयो न जायते ।
विज्ञानसारथिर् यस् तु मनः प्रग्रहवान् नरः ।
सोऽध्वनः पारम् आप्नोति तद् विष्णोः परमम् पदम् ।
इन्द्रियेभ्यः परा ह्य् अर्था अर्थेभ्यस् च परम् मनः ।
मनसस् तु परा बुद्धिर् बुद्धेर् आत्मा महान् परः ।
महतः परम् अव्यक्तम् अव्यक्तात् पुरुषः परः ।
पुरुषान् न परं किंचित् सा काष्ठा सा परा गतिः ।
एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते ।
दृश्यते त्व् अग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ।
यच्छेद् वाङ् मनसी प्राज्ञस् तद् यच्छेज् ज्ञान आत्मनि ।
ज्ञानम् आत्मनि महति नियच्छेत् तद् यच्छेच् छान्त आत्मनि ।
उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत ।

क्षुरस्य धारा निशिता दुरत्यया दुर्गम् पथस् तत् कवयो वदन्ति।
अशब्दम् अस्पर्शम् अरूपम् अव्ययं तथा ऽरसं नित्यम् अगन्धवच् च यत्।
अनाद्य् अनन्तम् महतः परं ध्रुवं निचाय्य तम् मृत्युमुखात् प्रमुच्यते।
नाचिकेतम् उपाख्यानम् मृत्युप्रोक्तं सनातनम्।
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते।
य इमम् परमं गुह्यं श्रावयेद् ब्रह्मसंसदि।
प्रयतः श्राद्धकाले वा तद् आनन्त्याय कल्पते तद् आनन्त्याय कल्पत इति॥
॥ इति तृतीया वल्ली ॥

पराञ्चि खानि व्यतृणत् स्वयम्भूस् तस्मात् पराङ् पश्यति ना ऽन्तरात्मन्।
कश्चिद् धीरः प्रत्यगात्मानम् ऐक्षद् आवृत्तचक्षुर् अमृतत्वम् इच्छन्।
पराचः कामान् अनुयन्ति बालास् ते मृत्योर् यन्ति विततस्य पाशम्।
अथ धीरा अमृतत्वं विदित्वा ध्रुवम् अध्रुवेष्व् इह न प्रार्थयन्ते।
येन रूपं रसं गन्धं शब्दान् स्पर्शांश् च मैथुनान्।
एतेनै ऽव विजानाति किम् अत्र परिशिष्यते। एतद् वै तत्।

काठ. ४.

स्वप्नान्तं जागरितान्तं चो’भौ येना’नुपश्यति ।
महान्तं विभुम् आत्मानं मत्वा धीरो न शोचति ।
य इमम् मध्वदं वेद आत्मानं जीवम् अन्तिकात् ।
ईशानम् भूतभव्यस्य न ततो विजुगुप्सते । एतद् वै तत् ।
यः पूर्वं तपसो जातम् अद्भ्यः पूर्वम् अजायत ।
गुहाम् प्रविश्य तिष्ठन्तं यो भूतेभिर् व्यपश्यत । एतद् वै तत् ।
या प्राणेन सम्भवत्य् अदितिर् देवतामयी ।
गुहाम् प्रविश्य तिष्ठन्तीं या भूतेभिर् व्यजायत । एतद् वै तत् ।
अरण्योर् निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः ।
दिवे दिव ईड्यो जागृवद्भिर् हविष्मद्भिर् मनुष्येभिर् अग्निः । एतद् वै तत् ।
यतश् चो’देति सूर्यो ऽस्तं यत्र च गच्छति ।
तं देवाः सर्वे अर्पितास् तद् उ ना’त्येति कश्चन । एतद् वै तत् ।
यद् एवे’ह तद् अमुत्र यद् अमुत्र तद् अन्व् इह ।
मृत्योः स मृत्युम् आप्नोति य इह नाने’व पश्यति ।
मनसै’वे’दम् आप्तव्यं ने’ह नाना’स्ति किंचन ।
मृत्योः स मृत्युं गच्छति य इह नाने’व पश्यति ।

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते। एतद् वै तत्।
अङ्गुष्ठमात्रः पुरुषो ज्योतिर् इवा’धूमकः।
ईशानो भूतभव्यस्य स एवा’द्य स उ श्वः। एतद् वै तत्।
यथो’दकं दुर्गे वृष्टम् पर्वतेषु विधावति।
एवं धर्मान् पृथक् पश्यंस् तान् एवा’नुविधावति।
यथो’दकं शुद्धे शुद्धम् आसिक्तं तादृग् एव भवति।
एवम् मुनेर् विजानत आत्मा भवति गौतम॥

॥ इति चतुर्थी वल्ली॥

पुरम् एकादशद्वारम् अजस्या’वक्रचेतसः।
अनुष्ठाय न शोचति विमुक्तश् च विमुच्यते। एतद् वै तत्।
हंसः शुचिषद् वसुर्अन्तरिक्षसद् होता वेदिषद्अतिथिर्दुरोणसत्।
नृषद् वरसद्ऋतसद् व्योमसद्अब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्।
ऊर्ध्वम् प्राणम् उन्नयत्य् अपानम् प्रत्यग् अस्यति।

काठ. ५.

मध्ये वामनम् आसीनं विश्वे देवा उपासते ।
अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः ।
देहाद् विमुच्यमानस्य किम् अत्र परिशिष्यते। एतद् वै तत्।
न प्राणेन ना॰पानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्न् एताव् उपाश्रितौ ।
हन्त इदम् प्रवक्ष्यामि गुह्यम् ब्रह्म सनातनम् ।
यथा च मरणम् प्राप्य आत्मा भवति गौतम ।
योनिम् अन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुम् अनुसंयन्ति यथा कर्म यथा श्रुतम् ।
य एष सुप्तेषु जागर्ति कामं कामम् पुरुषो निर्मिमाणः ।
तद् एव शुक्रं तद् ब्रह्म तद् एवा॰मृतम् उच्यते ।
तस्मिँल् लोकाः श्रिताः सर्वे तद् उ ना॰त्येति कश्चन । एतद् वै तत्।
अग्निर् यथै॰को भुवनम् प्रविष्टो रूपं रूपम् प्रतिरूपो बभूव ।
एकस् तथा सर्वभूतान्तरात्मा रूपं रूपम् प्रतिरूपो बभूव बहिश् च।
वायुर् यथै॰को भुवनम् प्रविष्टो रूपं रूपम् प्रतिरूपो बभूव ।
एकस् तथा सर्वभूतान्तरात्मा रूपं रूपम् प्रतिरूपो बभूव बहिश् च।

सूर्यो यथा सर्वलोकस्य चक्षुर् न लिप्यते चाक्षुषैर् वाह्यदोषैः ।
एकस् तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन वाह्यः ।
एको वशी सर्वभूतान्तरात्मा एकं रूपम् बहुधा यः करोति ।
तम् आत्मस्थं ये ऽनुपश्यन्ति धीरास् तेषां सुखं शाश्वतं ने ऽतरेषाम् ।
नित्यो ऽनित्यानां चेतनश् चेतनानाम् एको बहूनां यो विदधाति कामान् ।
तम् आत्मस्थं ये ऽनुपश्यन्ति धीरास् तेषां शान्तिः शाश्वती ने ऽतरेषाम् ।
तद् एतद् इति मन्यन्ते ऽनिर्देश्यम् परमं सुखम् ।
कथं नु तद् विजानीयां किमु भाति विभाति वा ।
न तत्र सूर्यो भाति न चन्द्रतारकं ने ऽमा विद्युतो भान्ति कुतो ऽयम् अग्निः ।
तम् एव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति ॥

॥ इति पञ्चमी वल्ली ॥

ऊर्ध्वमूलो ऽवाक्शाख एषो ऽश्वत्थः सनातनः ।
तद् एव शुक्रं तद् ब्रह्म तद् एवा ऽमृतम् उच्यते ।

तस्मिँल् लोकाः श्रिताः सर्वे तद् उ ना ऽत्येति कश्चन। एतद् वै तत्।
यद् इदं किं च जगत् सर्वम् प्राण एजति निःसृतम्।
महद् भयं वज्रम् उद्यतं य एतद् विदुर् अमृतास् ते भवन्ति।
भयाद् अस्या ऽग्निस् तपति भयात् तपति सूर्यः।
भयाद् इन्द्रश् च वायुश् च मृत्युर् धावति पञ्चमः।
इह चेद् अशकद् बोद्धुम् प्राक् शरीरस्य विस्रसः।
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते।
यथा दर्शे तथा ऽऽत्मनि यथा स्वप्ने तथा पितृलोके यथा ऽप्सु।
परी ऽव ददृशे तथा गन्धर्वलोके छायातपयोर् इव ब्रह्मलोके।
इन्द्रियाणाम् पृथग्भावम् उदयास्तमयौ च यत्।
पृथग् उत्पद्यमानानाम् मत्वा धीरो न शोचति।
इन्द्रियेभ्यः परम् मनो मनसः सत्त्वम् उत्तमम्।
सत्त्वाद् अधि महान् आत्मा महतो ऽव्यक्तम् उत्तमम्।
अव्यक्तात् तु परः पुरुषो व्यापको ऽलिङ्ग एव च।
यज् ज्ञात्वा मुच्यते जन्तुर् अमृतत्वं च गच्छति।
न संदृशे तिष्ठति रूपम् अस्य न चक्षुषा पश्यति कश्चनै ऽनम्।

काठ. ६.

हृदा मनीषा मनसा ऽभिक्लृप्तो य एतद् विदुर् अमृतास् ते भवन्ति।
यदा पञ्चा ऽवतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश् च न विचेष्टति ताम् आहुः परमां गतिम्।
तां योगम् इति मन्यन्ते स्थिराम् इन्द्रियधारणाम्।
अप्रमत्तस् तदा भवति योगो हि प्रभवाप्ययौ ।
नै ऽव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्ती ऽति ब्रुवतो ऽन्यत्र कथं तद् उपलभ्यते ।
अस्ती ऽत्य् एवो ऽपलब्धव्यस् तत्त्वभावेन चो ऽभयोः ।
अस्ती ऽत्य् एवो ऽपलब्धस्य तत्त्वभावः प्रसीदति ।
यदा सर्वे प्रमुच्यन्ते कामा ये ऽस्य हृदि श्रिताः ।
अथ मर्त्यो ऽमृतो भवत्य् अत्र ब्रह्म समश्नुते ।
यदा सर्वे प्रभिद्यन्ते हृदयस्ये ऽह ग्रन्थयः ।
अथ मर्त्यो ऽमृतो भवत्य् एतावद् अनुशासनम् ।
शतं चै ऽका च हृदयस्य नाड्यस् तासाम् मूर्द्धानम् अभिनिःसृतै ऽका।
तयो ऽर्द्ध्वम् आयन्न् अमृतत्वम् एति विष्वग् अन्या उत्क्रमणे भवन्ति।
अङ्गुष्ठमात्रः पुरुषो ऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः ।

काठ. ६.

तं स्वाच् छरीरात् प्रवृहेन् मुञ्जाद् इवेषीकां धैर्येण ।
तं विद्याच् छुक्रम् अमृतं तं विद्याच् छुक्रम् अमृतम् इति ।
मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्याम् एतां योगविधिं च कृत्स्नम् ।
ब्रह्मप्राप्तो विरजोऽभूद् विमृत्युर् अन्योऽप्य् एवं यो विद् अध्यात्मम् एव ।
स ह नाव् अवतु स ह नौ भुनक्तु स ह वीर्यं करवावहै
तेजस्विनाव् अधीतम् अस्तु मा विद्विषावहै ।
ओं शान्तिः शान्तिः शान्तिः हरिः ओम् ॥

॥ इति यजुर्वेदे काठकोपनिषदि षष्ठी वल्ली
समाप्ता द्वितीयोऽध्यायः समाप्तः ॥
॥ ओं तत् सत् ॥

यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनम् ।
मृत्युर् यस्यो ऽपसेचनं क इत्था वेद यत्र सः ॥
॥ इति द्वितीया वल्ली ॥

ऋतम् पिबन्तौ स्वकृतस्य लोके गुहाम् प्रविष्टौ परमे परार्द्धे ।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ।
यः सेतुर् ईजानानाम् अक्षरम् ब्रह्म यत् परम् ।
अभयं तितीर्षताम् पारं नाचिकेतं शकेमहि ।
आत्मानं रथिनं विद्धि शरीरं रथम् एव तु ।
बुद्धि तु सारथिं विद्धि मनः प्रग्रहम् एव च ।
इन्द्रियाणि हयान् आहुर् विषयांस् तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तम् भोक्ते ऽत्य् आहुर् मनीषिणः ।
यस् त्व् अविज्ञानवान् भवत्य् अयुक्तेन मनसा सदा ।
तस्ये ऽन्द्रियाण्य् अवश्यानि दुष्टाश्वा इव सारथेः ।
यस् तु विज्ञानवान् भवति युक्तेन मनसा सदा ।

काठ. ३.

तस्ये'न्द्रियाणि वश्यानि सदश्वा इव सारथेः ।
यस् त्व् अविज्ञानवान् भवत्य् अमनस्कः सदा'शुचिः ।
न स तत्पदम् आप्नोति संसारं चा'धिगच्छति ।
यस् तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदम् आप्नोति यस्माद् भूयो न जायते ।
विज्ञानसारथिर् यस् तु मनःप्रग्रहवान् नरः ।
सो ऽध्वनः पारम् आप्नोति तद् विष्णोः परमम् पदम् ।
इन्द्रियेभ्यः परा ह्य् अर्था अर्थेभ्यश् च परम् मनः ।
मनसस् तु परा बुद्धिर् बुद्धेर् आत्मा महान् परः ।
महतः परम् अव्यक्तम् अव्यक्तात् पुरुषः परः ।
पुरुषान् न परं किंचित् सा काष्ठा सा परा गतिः ।
एष सर्वेषु भूतेषु गूढो ऽत्मा न प्रकाशते ।
दृश्यते त्व् अग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ।
यच्छेद् वाङ् मनसी प्राज्ञस् तद् यच्छेज् ज्ञान आत्मनि ।
ज्ञानम् आत्मनि महति नियच्छेत् तद् यच्छेच् छान्त आत्मनि ।
उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत ।

क्षुरस्य धारा निशिता दुरत्यया दुर्गम् पथस् तत् कवयो वदन्ति।
अशब्दम् अस्पर्शम् अरूपम् अव्ययं तथा ऽरसं नित्यम् अगन्धवच् च यत्।
अनाद्य् अनन्तम् महतः परं ध्रुवं निचाय्य तम् मृत्युमुखात् प्रमुच्यते।
नाचिकेतम् उपाख्यानम् मृत्युप्रोक्तं सनातनम्।
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते।
य इमम् परमं गुह्यं श्रावयेद् ब्रह्मसंसदि।
प्रयतः श्राद्धकाले वा तद् आनन्त्याय कल्पते तद् आनन्त्याय कल्पत इति॥

॥ इति तृतीया वल्ली॥

पराञ्चि खानि व्यतृणत् स्वयम्भूस् तस्मात् पराङ् पश्यति ना ऽन्तरात्मन्।
कश्चिद् धीरः प्रत्यगात्मानम् ऐक्षद् आवृत्तचक्षुर् अमृतत्वम् इच्छन्।
पराचः कामान् अनुयन्ति बालास् ते मृत्योर् यन्ति विततस्य पाशम्।
अथ धीरा अमृतत्वं विदित्वा ध्रुवम् अध्रुवेष्व् इह न प्रार्थयन्ते।
येन रूपं रसं गन्धं शब्दान् स्पर्शांश् च मैथुनान्।
एतेनै ऽव विजानाति किम् अत्र परिशिष्यते। एतद् वै तत्।

काठ. ४.

स्वप्नान्तं जागरितान्तं चो'भौ येना'नुपश्यति ।
महान्तं विभुम् आत्मानं मत्वा धीरो न शोचति ।
य इमम् मध्वदं वेद आत्मानं जीवम् अन्तिकात् ।
ईशानम् भूतभव्यस्य न ततो विजुगुप्सते । एतद् वै तत् ।
यः पूर्वं तपसो जातम् अद्भ्यः पूर्वम् अजायत ।
गुहाम् प्रविश्य तिष्ठन्तं यो भूतेभिर् व्यपश्यत । एतद् वै तत् ।
या प्राणेन सम्भवत्य् अदितिर् देवतामयी ।
गुहाम् प्रविश्य तिष्ठन्तीं या भूतेभिर् व्यजायत । एतद् वै तत् ।
अरण्योर् निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः ।
दिवे दिव ईड्यो जागृवद्भिर् हविष्मद्भिर् मनुष्येभिर् अग्निः । एतद् वै तत् ।
यतश् चो'देति सूर्यो ऽस्तं यत्र च गच्छति ।
तं देवाः सर्वे अर्पितास् तद् उ ना'त्येति कश्चन । एतद् वै तत् ।
यद् एवे'ह तद् अमुत्र यद् अमुत्र तद् अन्व् इह ।
मृत्योः स मृत्युम् आप्नोति य इह नाने'व पश्यति ।
मनसै'वे'दम् आप्तव्यं ने'ह नाना'स्ति किंचन ।
मृत्योः स मृत्युं गच्छति य इह नाने'व पश्यति ।

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते । एतद् वै तत् ।
अङ्गुष्ठमात्रः पुरुषो ज्योतिर् इवा ऽधूमकः ।
ईशानो भूतभव्यस्य स एवा ऽद्य स उ श्वः । एतद् वै तत् ।
यथो ऽदकं दुर्गे वृष्टम् पर्वतेषु विधावति ।
एवं धर्मान् पृथक् पश्यंस् तान् एवा ऽनुविधावति ।
यथो ऽदकं शुद्धे शुद्धम् आसिक्तं तादृग् एव भवति ।
एवम् मुनेर् विजानत आत्मा भवति गौतम ॥

॥ इति चतुर्थी वल्ली ॥

पुरम् एकादशद्वारम् अजस्या ऽवक्रचेतसः ।
अनुष्ठाय न शोचति विमुक्तश् च विमुच्यते । एतद् वै तत् ।
हंसः शुचिषद् वसुर् अन्तरिक्षसद् धोता वेदिषद् अतिथिर् दुरोणसत् ।
नृषद् वरसद् ऋतसद् व्योमसद् अब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ।
ऊर्ध्वम् प्राणम् उन्नयत्य् अपानम् प्रत्यग् अस्यति ।

काठ. ५.

मध्ये वामनम् आसीनं विश्वे देवा उपासते ।
अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः ।
देहाद् विमुच्यमानस्य किम् अत्र परिशिष्यते। एतद् वै तत्।
न प्राणेन ना’पानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्न् एताव् उपाश्रितौ ।
हन्त इदम् प्रवक्ष्यामि गुह्यम् ब्रह्म सनातनम् ।
यथा च मरणम् प्राप्य आत्मा भवति गौतम ।
योनिम् अन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुम् अनुसंयन्ति यथा कर्म यथा श्रुतम् ।
य एष सुप्तेषु जागर्ति कामं कामम् पुरुषो निर्मिमाणः।
तद् एव शुक्रं तद् ब्रह्म तद् एवा’मृतम् उच्यते ।
तस्मिँल् लोकाः श्रिताः सर्वे तद् उ ना’त्येति कश्चन । एतद् वै तत्।
अग्निर् यथै’को भुवनम् प्रविष्टो रूपं रूपम् प्रतिरूपो बभूव ।
एकस् तथा सर्वभूतान्तरात्मा रूपं रूपम् प्रतिरूपो बभूव वहिश् च।
वायुर् यथै’को भुवनम् प्रविष्टो रूपं रूपम् प्रतिरूपो बभूव ।
एकस् तथा सर्वभूतान्तरात्मा रूपं रूपम् प्रतिरूपो बभूव वहिश् च।

काठ. ६.

सूर्यो यथा सर्वलोकस्य चक्षुर् न लिप्यते चाक्षुषैर् वाह्यदोषैः।
एकस् तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन वाह्यः।
एको वशी सर्वभूतान्तरात्मा एकं रूपम् बहुधा यः करोति।
तम् आत्मस्थं ये ऽनुपश्यन्ति धीरास् तेषां सुखं शाश्वतं ने ऽतरेषाम्।
नित्यो ऽनित्यानां चेतनश् चेतनानाम् एको बहूनां यो विदधाति कामान्।
तम् आत्मस्थं ये ऽनुपश्यन्ति धीरास् तेषां शान्तिः शाश्वती ने ऽतरेषाम्।
तद् एतद् इति मन्यन्ते ऽनिर्देश्यम् परमं सुखम्।
कथं नु तद् विजानीयां किम् उ भाति विभाति वा।
न तत्र सूर्यो भाति न चन्द्रतारकं ने ऽमा विद्युतो भान्ति कुतो ऽयम् अग्निः।
तम् एव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति॥

॥ इति पञ्चमी वल्ली॥

ऊर्ध्वमूलो ऽवाक्शाख एषो ऽश्वत्थः सनातनः।
तद् एव शुक्रं तद् ब्रह्म तद् एवा ऽमृतम् उच्यते।

तस्मिँल् लोकाः श्रिताः सर्वे तद् उ ना ऽत्येति कश्चन। एतद् वै तत्।
यद् इदं किं च जगत् सर्वम् प्राण एजति निःसृतम्।
महद् भयं वज्रम् उद्यतं य एतद् विदुर् अमृतास् ते भवन्ति।
भयाद् अस्या ऽग्निस् तपति भयात् तपति सूर्यः।
भयाद् इन्द्रश् च वायुश् च मृत्युर् धावति पञ्चमः।
इह चेद् अशकद् बोद्धुम् प्राक् शरीरस्य विस्रसः।
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते।
यथा दर्शे तथा ऽऽत्मनि यथा स्वप्ने तथा पितृलोके यथा ऽप्सु।
परी ऽव ददृशे तथा गन्धर्वलोके छायातपयोर् इव ब्रह्मलोके।
इन्द्रियाणाम् पृथग्भावम् उदयास्तमयौ च यत्।
पृथग् उत्पद्यमानानाम् मत्वा धीरो न शोचति।
इन्द्रियेभ्यः परम् मनो मनसः सत्त्वम् उत्तमम्।
सत्त्वाद् अधि महान् आत्मा महतो ऽव्यक्तम् उत्तमम्।
अव्यक्तात् तु परः पुरुषो व्यापको ऽलिङ्ग एव च।
यज् ज्ञात्वा मुच्यते जन्तुर् अमृतत्वं च गच्छति।
न संदृशे तिष्ठति रूपम् अस्य न चक्षुषा पश्यति कश्चनै ऽनम्।

काठ. ६.

हृदा मनीषा मनसा ऽभिक्लृप्तो य एतद् विदुर् अमृतास् ते भवन्ति।
यदा पञ्चा ऽवतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश् च न विचेष्टति ताम् आहुः परमां गतिम् ।
तां योगम् इति मन्यन्ते स्थिराम् इन्द्रियधारणाम् ।
अप्रमत्तस् तदा भवति योगो हि प्रभवाप्ययौ ।
नै ऽव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्ती ऽति ब्रुवतो ऽन्यत्र कथं तद् उपलभ्यते ।
अस्ती ऽत्य् एवो ऽपलब्धव्यस् तत्त्वभावेन चो ऽभयोः ।
अस्ती ऽत्य् एवो ऽपलब्धस्य तत्त्वभावः प्रसीदति ।
यदा सर्वे प्रमुच्यन्ते कामा ये ऽस्य हृदि श्रिताः ।
अथ मर्त्यो ऽमृतो भवत्य् अत्र ब्रह्म समश्नुते ।
यदा सर्वे प्रभिद्यन्ते हृदयस्ये ऽह ग्रन्थयः ।
अथ मर्त्यो ऽमृतो भवत्य् एतावद् अनुशासनम् ।
शतं चै ऽका च हृदयस्य नाड्यस् तासाम् मूर्धानम् अभिनिःसृतै ऽका ।
तयो ऽर्ध्वम् आयन्न् अमृतत्वम् एति विष्वग् अन्या उत्क्रमणे भवन्ति ।
अङ्गुष्ठमात्रः पुरुषो ऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः ।

तं स्वाच् छरीरात् प्रवृहेन् मुञ्जाद् इवे ऽषीकां धैर्येण ।
तं विद्याच् छुक्रम् अमृतं तं विद्याच् छुक्रम् अमृतम् इति।
मृत्युप्रोक्तां नचिकेतो ऽथ लब्ध्वा विद्याम् एतां योगविधिं च कृत्स्नम्।
ब्रह्मप्राप्तो विरजो ऽभूद् विमृत्युर् अन्यो ऽप्य् एवं यो विद् अध्यात्मम् एव।
स ह नाव् अवतु स ह नौ भुनक्तु स ह वीर्यं करवावहै
तेजस्विनाव् अधीतम् अस्तु मा विद्विषावहै ।
ॐ शान्तिः शान्तिः शान्तिः हरिः ॐम् ॥

॥ इति यजुर्वेदे काठकोपनिषदि षष्ठी वल्ली
समाप्ता द्वितीयो ऽध्यायः समाप्तः ॥
॥ ॐ तत् सत् ॥

काठकोपनिषद्भाष्यम्

भाष्यम्

ओम्
नमो वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय
नचिकेतसे च

अथ काठकोपनिषद्वल्लीनां सुखार्थप्रबोधनार्थम् अल्पग्रन्थावृत्तिर् आरभ्यते । सदेर् धातोर् विशरणगत्यवसादनार्थस्य उपनिपूर्वस्य क्विप्प्रत्ययान्तस्य रूपम् उपनिषद् इति । उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्यो ऽच्यते । केन पुनर् अर्थयोगेन उपनिषच्छब्देन विद्यो ऽच्यते इति । उच्यते । ये मुमुक्षवो दृष्टानुश्राविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्याम् उपसद्यो ऽपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषाम् अविद्यादेः संसारबीजस्य विशरणाद् धिंसनाद् विनाशनाद् इत्य् अनेनाऽर्थयोगेन विद्यो ऽपनिषद् इत्य् उच्यते । तथा च वक्ष्यति । निचाय्य तम् मृत्युमुखात् प्रमुच्यत इति । पूर्वोक्तविशेषणान् मुमुक्षून् वा परम् ब्रह्म गमयती ऽति ब्रह्मगमयितृत्वेन योगाद् ब्रह्मविद्यो ऽपनिषत् । तथा च वक्ष्यति । ब्रह्मप्राप्तो विरजो ऽभूद् विमृत्युर् इति । लोकादिब्रह्मजज्ञो यो ऽग्निस् तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः

भाष्यम्

स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्मजराद्युपद्रववृन्दस्य
लोकान्तरे पौनःपुन्येन प्रवृत्तस्य अवसादयितृत्वेन शैथिल्या-
पादनेन धात्वर्थयोगाद् अग्निविद्या ऽप्य् उपनिषद् इति उच्यते।
तथा च वक्ष्यति। स्वर्गलोका अमृतत्वम् भजन्त इत्यादि।
ननु च उपनिषच्छब्देन अध्येतारो ग्रन्थम् अभिलपन्ति।
उपनिषदम अधीमहे अध्यापयाम इति चै'वम्। नै'ष
दोषः। अविद्यादिसंसारहेतुविशरणादेः सदधात्वर्थस्य ग्रन्थ-
मात्रे ऽसम्भवाद्, विद्यायां च सम्भवाद् ग्रन्थस्या'पि ता-
दर्थ्येन तच्छब्दत्वोपपत्तेः। आयुर् वै घृतम् इत्यादिवत्।
तस्माद् विद्यायाम् मुख्यया वृत्त्या उपनिषच्छब्दो वर्तते
ग्रन्थे तु भक्त्ये'ति। एवम् उपनिषन्निर्वचनेनै'व वि-
शिष्टो ऽधिकारी विद्यायाम् उक्तः। विषयश् च विशिष्ट
उक्तो विद्यायाः परब्रह्म प्रत्यगात्मभूतम् प्रयोजनं चा'
स्या उपनिषद आत्यन्तिकी संसारनिवृत्तिर् ब्रह्मप्राप्ति-
लक्षणा। सम्बन्धश् चै'वम् भूतप्रयोजनेनो'क्तः। अतो
यथोक्ताधिकारिविषयप्रयोजनसम्बन्धायाः विद्यायाः करत-
लन्यस्तामलकवत् प्रकाशकत्वेन विशिष्टाधिकारिविषय-
प्रयोजनसम्बन्धाः एता वल्ल्यो भवन्ती'त्य् अतः ताः यथा
प्रतिभानं व्याचक्ष्महे। तत्रा''ख्यायिका विद्यास्तुत्यर्था।
-उशन्- कामयमानः -ह वै- इति वृत्तार्थस्मरणार्थौ

भाष्यम् .

निपातौ वाजम् अन्नं तद्दानादिनिमित्तं श्रवो यशो यस्य स वाजश्रवाः रूढितो वा तस्या ऽपत्यं – वाजश्रवसः – किल विश्वजिता सर्वमेधेन ईजे तत्फलं कामयमानः । स च तस्मिन् क्रतौ – सर्ववेदसं – सर्वं स्वं धनं – ददौ – दत्तवान् । – तस्य – यजमानस्य – ह नचिकेता नाम पुत्रः – किल – आस – बभूव । – तं ह – नचिकेतसं – कुमारम् – प्रथमवयसं – सन्तम् – अप्राप्तप्रजननशक्तिम् बालम् एव – श्रद्धा – आस्तिक्यबुद्धिः पितुर् हितकामप्रयुक्ता – आविवेश – प्रविष्टवती कस्मिन् काले इत्य् आह ऋत्विग्भ्यः सदस्येभ्यश् च – दक्षिणासु नीयमानासु – विभागेनो ऽपनीयमानासु दक्षिणार्थासु गोषु । – सः – आविष्टश्रद्धो नचिकेताः – अमन्यत – आलोचितवान् । कथम् इत्य् उच्यते । – पीतोदका – इत्यादिना दक्षिणार्था गावो विशिष्यन्ते । पीतम् उदकं याभिस् ताः पीतोदकाः जग्धम् भक्षितं तृणं याभिस् ताः – जग्धतृणाः – दुग्धो दोहः क्षीराख्यो यासां ताः – दुग्धदोहाः – – निरिन्द्रियाः – अप्रजननसमर्थाः जीर्णा निष्फला गाव इत्य् अर्थः यास् – ता – एवम् भूता गा ऋत्विग्भ्यो दक्षिणा बुद्ध्या – ददत् – प्रयच्छन् । – अनन्दाः – अनानन्दा असुखा नामे ऽत्य् एतद् ये – ते लोकास् तान् स – यजमानः – गच्छति – । तद् एवं ऋत्व् असम्पत्तिनिमित्तम् पितुर् अनिष्टम् फलम् मया पुत्रेण

भाष्यम्.

सता निवारणीयम् आत्मप्रदानेना ऽपि क्रतुसम्पत्तिं कृत्वा एवम् मत्वा पितरम् उपगम्य – स हो ऽवाच पितरं – हे – तात कस्मै – ऋत्विग्विशेषाय दक्षिणार्थम् – मां दास्यसि – प्रयच्छसी ऽत्य् एतद् एवम् उक्तेना ऽपि पित्रा उपेक्ष्यमाणो ऽपि – द्वितीयं तृतीयम् – अप्य् उवाच कस्मै मां दास्यसी ऽति ना ऽयं कुमारस्वभाव इति क्रुद्धः सन् पिता – तं ह – पुत्रं किल – उवाच मृत्यवे – वैवस्वताय – त्वा – त्वां – ददामि – ‌। स एवम् उक्तः पुत्रः एकान्ते परिदेवयां चकार। कथम् इत्य् उच्यते – बहूनां – शिष्याणाम् पुत्राणां वा – एमि – गच्छामि – प्रथमः – सन् मुख्यया शिष्यादिवृत्त्ये ऽत्य् अर्थः । मध्यमानां च – बहूनाम् – मध्यमये ऽव वृत्त्या – एमि – ना ऽधमया कदाचिद् अपि । तम् एवं विशिष्टगुणम् अपि पुत्रम् माम् मृत्यवे त्वा ददामी ऽत्य् उक्तवान् पिता । स – किंस्विद् यमस्य कर्तव्यम् – प्रयोजनम् – मया – प्रत्तेन – करिष्यति यत् – कर्तव्यम् – अद्य – नूनम् प्रयोजनम् अनपेक्ष्ये ऽव क्रोधवशाद् उक्तवान् पिता तथा ऽपि तत् पितुर् वचो मृषा मा ऽभूद् इत्य् एवम् मत्वा परिदेवनापूर्वकम् आह पितरं शोकाविष्टं किम् मयो ऽक्तम् इति । – अनुपश्य – आलोचय निभालया ऽनुक्रमेण – यथा – येन प्रकारेण वृत्ताः – पूर्वे – अतिक्रान्ताः पितृपितामहादयस् तव तान् दृष्ट्वा च तेषां वृत्तम् आस्थातुम् अर्हसि वर्तमानाम् च – परे – साधवो वर्तन्ते तांस् च – प्रतिपश्य – आलोचय – तथा – न च तेषु

मृषाकरणं वृत्तं वर्त्तमानं वा ऽस्ति तद्विपरीतम् असतां च वृत्तम् मृषाकरणम् । न च मृषा कृत्वा कश्चिद् अजरामरो भवति यतः –सस्यम् इव मर्त्यो –मनुष्यः –पच्यते– जीर्णो म्रियते मृत्वा च –सस्यम् इवा ऽऽजायते –आविर् भवति –पुनर्– एवम् अनित्ये जीवलोके किम् मृषाकरणेन पालया ऽऽत्मनः सत्यम् प्रेषय मां यमाये ऽत्य् अभिप्रायः स एवम् उक्तः पिता ऽऽत्मनः सत्यताये प्रेषयामास स च यमभवनं गत्वा तिस्रो रात्रीर् उवास यमे प्रोषिते यमम् प्रोष्या ऽऽगतम् अमात्या भार्या वा ऊचुर् बोधयन्तस् तत् किम् इत्य् आह । –वैश्वानरो– ऽग्निर् एव साक्षात् –प्रविशत्य् अतिथिः –सन् –ब्राह्मणो गृहान्– दहन् इव –तस्य– दाहं शमयन्त इवा ऽग्नेर् – एतां– पाद्यासनादिदानलक्षणां– शान्तिं कुर्वन्ति– सन्तो ऽतिथेर् यतो ऽत आहर –हर– हे वैवस्वत उदकं –नचिकेतसे पाद्यार्थम् । यतश् चा ऽकरणे प्रत्यवायः श्रूयते । –आशाप्रतीक्षे– अनिर्ज्ञातप्राप्तीष्टार्थप्रार्थना आशा निर्ज्ञातप्राप्यार्थप्रतीक्षणम् प्रतीक्षा ते आशाप्रतीक्षे – सङ्गतं– सत्संयोगजम् फलं –सूनृतां च– सूनृता प्रिया वाक् तन्निमित्तं च –इष्टापूर्त्ते– इष्टं यागजम् फलम् पूर्त्तम् आरामादिक्रियाजम् फलम् –पुत्रपशूंस् च सर्वान् एतत्– सर्वं यथोक्तं – वृङ्क्ते– आवर्जयति नाशयती ऽत्य् एतत् –पुरुषस्या ऽल्पमेधसो– ऽल्पप्रज्ञस्य –यस्या ऽनश्नन्– अभुञ्जानो –ब्राह्मणो गृहे वसति– । तस्माद् अनुपेक्षणीयः सर्वावस्थास्व् अप्य् अतिथिर्

भाष्यम्.

इत्य् अर्थः। एवम् उक्तो मृत्युर् उवाच नचिकेतसम् उपगम्य पूजापुरःसरम्। किं तद् इत्य् आह। –तिस्रो रात्रीर् यद् –यस्माद् –अवात्सीः –उषितवान् असि –गृहे मे –मम –अनश्नन् –हे –ब्रह्मन् अतिथिः –सन् –नमस्यो –नमस्कारार्हश् च तस्मान् –नमस् ते –तुभ्यम् –अस्तु –भवतु हे –ब्रह्मन् स्वस्ति –भद्रम् –मेऽस्तु तस्माद् –भवतोऽनशनेन मद्गृहवासनिमित्ताद् दोषात् तत्प्राप्त्युपशमेन। यद्य् अपि तव तावद् अनुग्रहेण सर्वम् मम स्वस्ति स्यात् तथाऽपि त्वदधिकसम्प्रसादनार्थम् अनशनेनोऽपोषिताम् एकैकाम् रात्रिम् –प्रति त्रीन् वरान् वृणीष्व –अभिप्रेतार्थविशेषान् प्रार्थयस्व मत्तः। नचिकेतास् त्व् आह। यदि दित्सुर् वरान् –शान्तसङ्कल्पः –उपशान्तः सङ्कल्पो यस्य माम् प्रति यमम् प्राप्य किं नु करिष्यति मम पुत्र इति सः शान्तसङ्कल्पः –सुमनाः –प्रसन्नमनाश् च –यथा स्याद् वीतमन्युः –विगतरोषश् च –गौतमो –मम पिता –माऽभि –माम् प्रति हे –मृत्यो –किं च –त्वत्प्रसृष्टं –त्वया विनिर्मुक्तम् प्रेषितं गृहम् प्रति –माम् अभिवदेत् प्रतीतो –लब्धस्मृतिः स एवाऽयम् पुत्रो ममाऽऽगत इत्य् एवम् प्रत्यभिजानन्न् इत्य् अर्थः। –एतत् –प्रयोजनं –त्रयाणाम् –वराणाम् –प्रथमम् –आद्यं –वरं वृणे –प्रार्थयेयं यद्यत् पितुःपरितोषणम्। मृत्युर् उवाच। –यथा –बुद्धिस् त्वयि –पुरस्तात् –पूर्वम् आसीत् स्नेहसमन्विता पितुस् तव –भविता –प्रीतिसमन्वितस् तव पिता

भाष्यम् .

तथैऽव–प्रतीतः–प्रतीतवान् सन्–औद्दालकिः–उद्दालक एवौ ऽद्दालकिः अरुणस्याऽपत्यम्–आरुणिः–द्व्यामुष्यायणो वा–मत्प्रसृष्टो–मयाऽनुज्ञातः सन् इतरा अपि–रात्रीः सुखम्–प्रसन्नमनाः –शयिता–सुप्ता–वीतमन्युर्–विगतमन्युश् च भविता स्यात् –त्वाम्–पुत्रं–ददृशिवान्–दृष्टवान्–मृत्युमुखात्–मृत्युगोचरात् –प्रमुक्तं–सन्तम् ‌। नचिकेता उवाच । –स्वर्गे लोके–रोगादिनिमित्तम्–भयं किंचन–किंचिद् अपि–नाऽस्ति न–च–तत्र त्वं–हे मृत्यो सहसा प्रभवस्याऽतो–जरया–युक्त इह लोकवत् त्वत्तो –न बिभेति–कुतश्चित् तत्र किं च–उभे अशनायापिपासे तीर्त्वा–अतिक्रम्य शोकम् अतीत्य गच्छति इति–शोकातिगः–सन् मानसेन दुःखेन वर्जितो–मोदते–हृष्यति–स्वर्गलोके–दिव्ये । एवं गुणविशिष्टस्य स्वर्गलोकस्य प्राप्तिसाधनभूतम्–अग्निं स त्वम्–मृत्युर् –अध्येषि–स्मरसि जानासीऽत्य् अर्थः हे–मृत्यो–यतस् त्वम्–प्रब्रूहि–कथय–श्रद्दधानाय–श्रद्धावते–मह्यं–स्वर्गार्थिने । येनाऽग्निना चितेन–स्वर्गलोकाः–स्वर्गो लोको येषां ते स्वर्गलोका यजमानाः –अमृतत्वम्–अमरतां देवत्वम्–भजन्ते–प्राप्नुवन्ति तद्–एतद्–अग्निविज्ञानं–द्वितीयेन वरेण वृणे–मृत्योः प्रतिज्ञेयम्–प्र ते–तुभ्यम् –प्रब्रवीमि तत्–त्वत्प्रार्थितम्–उ मे–मम वचसो–निबोध–बुध्यस्वैऽकाग्रमनाः सन्–स्वर्ग्यं–स्वर्गाय हितं स्वर्गसाधनम्–अग्निं–हे–नचिकेतः प्रजानन्–विज्ञातवान् अहं सन् इत्य् अर्थः ।

भाष्यम्.

प्रब्रवीमि तन् निबोधे ऽति च शिष्यबुद्धिसमाधानार्थं वचनम् ।
अधुना ऽग्निं स्तौति । -अनन्तलोकाप्तिम्-अनन्तस्वर्गलोकफल-
प्राप्तिसाधनम् इत्य् एतत् । -अथो-अपि-प्रतिष्ठाम्-आश्रयं जगतो
विराड्रूपेण तम्-एतम्-अग्निम् मयो ऽच्यमानं-विद्धि-विजानीहि
-त्वम् निहितं-स्थितं-गुहायां-विदुषाम् बुद्धौ निविष्टम् इत्य् अर्थः ।
इदं श्रुतेर् वचनम् । -लोकादि-लोकानाम् आदिम् प्रथमशरीरत्वाद्
-अग्निं तम्-प्रकृतं नचिकेतसा प्रार्थितम्-उवाच-उक्तवान् मृत्युस्
-तस्मै-नचिकेतसे । किं च-या इष्टकास्-चेतव्याः स्वरूपेण
-यावतीर् वा-सङ्ख्यया-यथा वा-चीयते ऽग्निः येन प्रकारेण सर्वम्
एतद् उक्तवान् इत्य् अर्थः । -स चा ऽपि-नचिकेताः-तत्-मृत्युनो-
क्तं-यथावत् प्रत्ययेन-अवदत्-प्रत्युच्चारितवान् । तस्य प्रत्युच्चा-
रणेन-तुष्टः-सन्-मृत्युः पुनर्-एव-आह-वरत्रयव्यतिरेकेणा ऽन्यं
वरं दित्सुः । कथं-तं-नचिकेतसम्-अब्रवीत् प्रीयमाणः-शिष्ययोग्य-
ताम् पश्यन् प्रीयमाणः प्रीतिम् अनुभवन्-महात्मा-अक्षुद्रबुद्धिः-वरं
तव-चतुर्थम्-इह-प्रीतिनिमित्तम्-अद्य-इदानीं-ददामि भूयः-
पुनः प्रयच्छामि । -तवै ऽव-नचिकेतसो-नाम्ना-अभिधानेन प्रसिद्धो
-भविता-मयो ऽच्यमानो-अयम् अग्निः- । किं च-सृङ्कां-शब्दव-
तीं रत्नमयीम् मालाम्-इमाम् अनेकरूपां-विचित्रां-गृहाण-
स्वीकुरु सृङ्कां वा ऽकुत्सितां गतिं कर्ममयीं गृहाण अन्यद् अपि कर्मवि-
ज्ञानम् अनेकफलहेतुत्वात् स्वीकुर्व् इत्य् अर्थः । पुनर् अपि

भाष्यम्.

कर्मस्तुतिम् एवाऽऽह । – त्रिणाचिकेतः – त्रिःकृत्वो नाचिकेतो ऽग्निः चितो येन सः त्रिणाचिकेतः तद्विज्ञानस् तदध्ययनः तदनुष्ठानवान् वा – त्रिभिर् – मातृपित्राचार्यैर् – एत्य – प्राप्य – सन्धिं – सन्धानं सम्बन्धम् मात्राद्यनुशासनं यथावत् प्राप्येऽत्य् एतत् तद् धि प्रामाण्यकारणं श्रुत्यन्तराद् अवगम्यते यथा मातृमान् इत्य् आदेः । वेदस्मृतिशिष्टैर् वा प्रत्यक्षानुमानागमैर् वा तेभ्यो हि विशुद्धिः प्रत्यक्षा । – त्रिकर्मकृद् – इज्याध्यायनदानानां कर्त्ता – तरति – अतिक्रामति जन्म च मृत्युं च – जन्ममृत्यू । किं च । – ब्रह्मजज्ञम् – ब्रह्मणो हिरण्यगर्भाज् जातो ब्रह्मजः ब्रह्मजश् चाऽसौ ज्ञश् चेऽति ब्रह्मजज्ञः सर्वज्ञो ह्य् असौ तं – देवं – द्योतनज्ञानादिगुणवन्तम् – ईड्यं – स्तुत्यं – विदित्वा – शास्त्रतः – निचाय्य – दृष्ट्वा च आत्मभावेन – इमां – स्वबुद्धिप्रत्यक्षां – शान्तिम् – उपरतिम् – अत्यन्तम् एति – अतिशयेनेऽति वैराजम् पदं ज्ञानकर्मसमुच्चयानुष्ठानेन प्राप्नोतीऽत्य् अर्थः । इदानीम् अग्निविज्ञानचयनफलम् उपसंहरति प्रकरणं च । – त्रिणाचिकेतस् त्रयं – यथोऽक्तं या इष्टका यावतीर् वा यथा वेऽत्य् – एतद् विदित्वा – अवगम्य – यश् – चैऽवम् – आत्मरूपेणाऽग्निं – विद्वांश् चिनुते – निर्वर्तयति – नाचिकेतम् – अग्निं क्रतुं – स मृत्युपाशान् – अधर्माज्ञानरागद्वेषादिलक्षणान् – पुरतः – अग्रतः पूर्वम् एव शरीरपाताद् इत्य् अर्थः – प्रणोद्य – अपहाय – शोकातिगो – मानसैर् दुःखैर् विवर्जित इत्य् एतन् – मोदते स्वर्गलोके – वैराजे विराडात्मस्वरूपप्रतिपत्त्या ।

भाष्यम्.

-एष ते-तुभ्यम् अग्निर्-वरो हे-नचिकेतः स्वर्ग्यः-स्वर्गसाधनं -यम्-अग्निं वरम्-अवृणीथाः-प्रार्थितवान् असि-द्वितीयेन वरेण-सो ऽग्निर् वरो दत्त इत्य् उक्तो 'पसंहारः । किं च-एतम् अग्निं तवैव नाम्ना प्रवक्ष्यन्ति जनासः-जना इत्य् एष वरो दत्तो मया चतुर्थस् तुष्टेन । -तृतीयं वरं नचिकेतो वृणीष्व-तस्मिन् ह्य् अदत्ते ऋणवान् एवा 'हम् इत्य् अभिप्रायः । एतावद् व्यतिक्रान्तेन विधिप्रतिषेधार्थेन मन्त्रब्राह्मणेना 'वगन्तव्यं यद् वरद्वयसूचितं वस्तु ना ''त्मतत्त्वविषयं याथात्म्यविज्ञानम् अतो विधिप्रतिषेधार्थविषयस्या ''त्मनि क्रियाकारकफलाध्यारोपणलक्षणस्य स्वाभाविकस्य अज्ञानस्य संसारबीजस्य निवृत्त्यर्थं तद्विपरीतब्रह्मात्मैकत्वविज्ञानं क्रियाकारकफलाध्यारोपणलक्षणशून्यम् आत्यन्तिकनिःश्रेयसप्रयोजनं वक्तव्यम् इत्य् उत्तरो ग्रन्थ आरभ्यते । तम् एतम् अर्थं द्वितीयवरप्राप्त्या ''प्य कृतार्थत्वं तृतीयवरगोचरम् आत्मज्ञानम् अन्तरेणे 'त्य् आख्यायिकया प्रपञ्चयति । यतः पूर्वस्मात् कर्मगोचरात् साध्यसाधनलक्षणाद् अनित्याद् विरक्तस्या ''त्मज्ञाने ऽधिकार इति तन्निन्दार्थम् पुत्राद्युपन्यासेन प्रलोभनं क्रियते । नचिकेता उवाच तृतीयं वरं नचिकेतो वृणीष्वे 'त्य् उक्तः सन् । -ये 'यं विचिकित्सा-संशयः-प्रेते-मृते-मनुष्ये अस्ती 'त्य् एके-शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तो देहान्तरसम्बन्ध्य् आत्मे 'त्य् एके-ना 'यम् अस्ती 'ति चै 'के-ना 'यम् एवंविधो ऽस्ती 'ति चै 'के अतस्

भाष्यम्.

चा ऽस्माकं न प्रत्यक्षेण ना ऽपि चा ऽनुमानेन निर्णयविज्ञानम् एतद् विज्ञानाधीनो हि परः पुरुषार्थः इत्य् अत – एतद् विद्यां-विजानीयाम् – अहम् अनुशिष्टो – ज्ञापितस् – त्वया – । – वराणाम् एष वरस् तृतीयो – ऽवशिष्टः । किम् अयम् एकान्ततो निःश्रेयस-साधनाया ऽऽत्मज्ञानार्हो न वे ऽत्य् एतत् परीक्षणार्थम् आह । – देवैर् अप्य् अत्र – एतस्मिन् वस्तुनि – विचिकित्सितं – संशयितम् – पुरा – पूर्वं – न हि सुविज्ञेयं – सुष्ठु विज्ञेयं श्रुतम् अपि प्राकृतैर् जनैः यतो – ऽणुः – सूक्ष्मः – एष – आत्माख्यो – धर्मः – अतो – ऽन्यम् – असंदिग्धफलं – वरं नचिकेतो वृणीष्व मा – माम् – मो ऽपरोत्सीर् – उपरोधम् मा ऽकार्षीः अधमर्णम् इवो ऽत्तमर्णः – अतिसृज – विमुञ्चे – ऽनम् – वरम् – मा – माम् प्रति । एवम् उक्तो नचिकेता आह । – देवैर् अत्रा ऽपि विचिकित्सितं किले – ऽति भवत एव नः श्रुतं – त्वं च मृत्यो यद् – यस्मान् – न सुज्ञेयम् – आत्मतत्त्वम् – आत्थ – कथयसि अतः पण्डितैर् अप्य् अवेदनीयत्वाद् – वक्ता चा ऽस्य – धर्मस्य – त्वादृक् – त्वत्तुल्यो – ऽन्यः – पण्डितस् च – न लभ्यो – ऽन्वि-ष्यमाणो ऽपि । अयं तु वरो निश्रेयसप्राप्तिहेतुर् अतो – ना ऽन्यो वरस् तुल्यः – सदृशो ऽस्त्य् – एतस्य कश्चिद् – अपि अनित्यफलत्वाद् अन्यस्य सर्वस्यै ऽवे ऽत्य् अभिप्रायः । एवम् उक्तो ऽपि पुनः प्रलोभयन्न् उवाच मृत्युः । – शतायुषः – शतं वर्षाण्य् आयूंषि येषां तान् शतायुषः – पुत्रपौत्रान् वृणीष्व – किं च गवादिलक्षणान् – बहून् पशून् –

भाष्यम्.

हस्ती च हिरण्यं च (हस्तिहिरण्यम् अश्वांस्) च। किं च (भूमेः) पृथिव्याः (महद्) विस्तीर्णम् (आयतनम्) आश्रयम् मण्डलं राज्यं (वृणीष्व) किं च सर्वम् अप्य् एतद् अनर्थकं स्वयं चेद् अल्पायुर् इत्य् अत आह। (स्वयं) त्वं (जीव) धारय शरीरं समग्रेन्द्रियकलापं (शरदो) वर्षाणि (यावद् इच्छसि) जीवितुम् इत्य् अर्थः (एतत् तुल्यम्) एतेन यथो ऽपदिष्टेन सदृशम् अन्यम् अपि (यदि मन्यसे वरं) तम् अपि (वृणीष्व)। किं च (वित्तम्) प्रभूतं हिरण्यरत्नादि (चिरजीविकां च) सह वित्तेन वृणीष्वे ऽत्यत् किम् बहुना महत्याम् (भूमौ) राजा (नचिकेतस् त्वम् एधि) भव किं चा ऽन्यत् कामानां दिव्यानाम् मानुषाणां च (त्वा) त्वां (कामभाजं) कामभागिनं कामार्हं (करोमि) सत्यसङ्कल्पो ह्य् अहं देवः (ये ये कामाः) प्रार्थनीया (दुर्लभाम्) च (मर्त्य-लोके सर्वांस्) तान् (कामांश् छन्दत) इच्छातो मत्तः (प्रार्थयस्व) किं च (इमाः) दिव्या अप्सरसो रमयन्ति पुरुषान् इति (रामाः) सह रथैर् वर्तन्ते इति (सरथाः सतूर्याः) सवादित्राः ताम् च (न हि लम्भनीयाः) प्रापणीयाः (ईदृशाः) एवंविधा (मनुष्यैर्) मर्त्यैर् अस्मदादिप्रसादम् अन्तरेण (आभिर् मत्प्रत्ताभिर्) मया दत्ताभिः परिचारिणीभिः (परिचारयस्व) आत्मानम् पादप्रक्षालनादिना शुश्रूषां कारया ऽऽत्मनः इत्य् अर्थः। हे (नचिकेतो मरणम्) मरणसम्बन्धम् प्रश्नम् प्रेत्या ऽस्ति ना ऽस्ती ऽति

भाष्यम्.

काकदन्तपरीक्षारूपम् (मा ऽनुप्राक्षीः) मे ऽवम् प्रष्टुम् अर्हसि। एवम् प्रलोभ्यमानो ऽपि नचिकेता महाह्रदवद् अक्षोभ्यः आह। श्वो भविष्यन्ति न भविष्यन्ति वे ऽति सन्दिह्यमान एव येषाम् भवो भवनं त्वयो ऽपन्यस्तानाम् भोगानां ते (श्वोभावाः) किं च (मर्त्यस्य) मनुष्यस्य (अन्तक) हे मृत्यो (यद् एतत् सर्वेन्द्रियाणां तेजस्) तज् (जरयन्ति) अपक्षयन्त्य् अप्सरःप्रभृतयो भोगाः अनर्थाये ऽव एते धर्मवीर्यप्रज्ञातेजोयशः-प्रभृतीनां क्षपयितृत्वाद्. यां चा ऽपि दीर्घजीविकां त्वं दित्ससि तत्रा ऽपि शृणु (सर्वं) यद् ब्रह्मणो (अपि जीवितम्) आयुर् (अल्पम् एव) किमुत अस्मदादिदीर्घजीविका अतस् (तवै ऽव) तिष्ठन्तु (वाहाः) रथादयः तथा (नृत्यगीते) च। किं च (न) प्रभूतेन (वित्तेन तर्पणीयो मनुष्यः) न हि वित्तलाभो लोके कस्यचित् तृप्तिकरो दृष्टः। यदि नाम अस्माकं वित्ततृष्णा स्याल् (लप्स्यामहे) प्राप्स्याम इत्य् एतद् (वित्तम् अद्राक्ष्म) दृष्टवन्तः वयं (चेत् त्वा) त्वाम्। जीविते ऽपि तथै ऽव (जीविष्यामो यावद्) याम्ये पदे (त्वम् ईशिष्यसि) ईशिष्यसे प्रभुः स्याःकथं हि मर्त्यस् त्वया समेत्य अल्पधनायुर् भवेत्। (वरस् तु मे वरणीयः स एव) यद् आत्मविज्ञान यतम् चा (ऽजीर्यतां) वयो हानिम् अप्राप्नुवताम् (अमृतानां) सकाशम् (उपेत्य) उपगम्य आत्मन उत्कृष्टम् प्रयोजनान्तरम् प्राप्तव्यं

भाष्यम्.

तेभ्यः (प्रजानन्) उपलभमानः स्वयं तु (जीर्यन् मर्त्यः) जरामरणवान् । (क्वधःस्थः) कुः पृथिवी अधश् चा ऽन्तरीक्षादिलोकापेक्षया तस्यां तिष्ठती ऽति क्वधःस्थः सन् कथम् एवम् अविवेकिभिः प्रार्थनीयम् पुत्रवित्तहिरण्याद्यस्थिरं वृणीते । क्व तदास्थ इति पाठान्तरं तस्मिन् पक्षे च अक्षरयो जना तेषु पुत्रादिषु आस्था आस्थितिस् तात्पर्येण वर्तनं यस्य स तदास्थः ततो ऽधिकतरम् पुरुषार्थं दुःप्रापम् अपि प्रापयिषुः क्व तदास्थो भवेन् न कश्चित् तद् असारज्ञः तदर्थः स्याद् इत्य् अर्थः सर्वो ह्य् उपर्युपर्य् एव बुभूषति लोकः । तस्मान् न पुत्रवित्तादिभिर् लोभैः प्रलोभ्यो ऽहम् । किं च अप्सरःप्रमुखान् (वर्णरतिप्रमोदान्) अनवस्थितरूपतया (अभिध्यायन्) निरूपयन् अन्यथावद् (अतिदीर्घे जीविते को) विवेकी (रमेत) अतो विहाया ऽनित्यैः कामैः प्रलोभनं यन् मया प्रार्थितं (यस्मिन्) प्रेते (इदं विचिकित्सन्ति) अस्ति ना ऽस्ती ऽत्य् एवम् प्रकारं हे (मृत्यो साम्पराये) परलोकविषये (महति) महत्प्रयोजननिमित्ते आत्मनो निर्णयविज्ञानं (यत् तद् ब्रूहि) कथय (नो) ऽस्मभ्यं किम् बहुना (यो ऽयम्) प्रकृत आत्मविषयो (वरो गूढं) गहनं दुर्विवेचनम् प्राप्तो (ऽनुप्रविष्टः तस्माद्) वराद् (अन्यम्) अविवेकिभिः प्रार्थनीयम् अनित्यविषयं वरं (नचिकेता न वृणीते) मनसा ऽपी ऽति श्रुतेर् वचनम् इति ॥

भाष्यम्.

इति कठवल्ल्याम् प्रथमवल्लीभाष्यं ॥ समाप्तम् ॥

परीक्ष्य शिष्यं विद्यायोग्यतां चाऽवगम्याह । (अन्यत्) पृथग् एव (श्रेयो) निःश्रेयसं तथा (ऽन्यद् उत) अपि च (प्रेयः) प्रियतरम् अपि (ते) प्रेयःश्रेयसी (उभे नानार्थे) भिन्नप्रयोजने सती (पुरुषम्) अधिकृतं वर्णाश्रमादिविशिष्टं (सिनीतो) बध्नीतः ताभ्याम् आत्मकर्तव्यतया प्रयुज्यते सर्वः पुरुषः श्रेयःप्रेयसोर् ह्य् अभ्युदया ऽमृतत्वार्थी सन् पुरुषः प्रवर्त्तते अतः श्रेयःप्रेयःप्रयोजनकर्तव्यतया ताभ्याम् बद्ध इत्य् उच्यते सर्वः पुरुषः । ते यद्य् अप्य् एकैकपुरुषसम्बन्धिनी विद्याविद्यारूपत्वाद् विरुद्धे इत्य् अन्यतरा परित्यागेने ऽकेन पुरुषेण सहा ऽनुष्ठातुम् अशक्यत्वात् (तयोर्) हित्वा ऽविद्यारूपम् (प्रेयः) श्रेयः एव केवलम् (आददानस्य) उपादानं कुर्वतः (साधु) शोभनं शिवम् (भवति) । यस् त्व् अदूरदर्शी विमूढो (हीयते) वियुज्यते (ऽर्थात्) पुरुषार्थात् पारमार्थिकात् प्रयोजनान् नित्यात् प्रच्यवत इत्य् अर्थः । को ऽसौ (य उ प्रेयो वृणीते) उपादत्त इत्य् एतत् । यद्य् उभे अपि कर्तुं स्वायत्ते पुरुषेण किमर्थम् प्रेय एव आदत्ते बाहुल्येन लोक इति उच्यते ।

भाष्यम्.

सत्यं स्वायत्ते तथा ’पि साधनतः फलतश् च मन्दबुद्धीनां
दुर्विवेकरूपे सती व्यामिश्रीभूते इव पुरुषम् आ इतः (एतः)
प्राप्नुतः (श्रेयश् च प्रेयश् च) अतो हंस इवा ’म्भसः पयः
(तौ) श्रेयःप्रेयःपदार्थौ (सम्परीत्य) सम्यक् परिगम्य सम्यङ्
मनसा आलोच्य गुरुलाघवं (विविनक्ति) पृथक् करोति
(धीरः) धीमान् विविच्य च (श्रेयो हि) श्रेय एवा ’ (भिवृ-
णीते प्रेयसो) ऽभ्यर्हितत्वात् को ऽसौ (धीरः)। यस् तु
(मन्दो) ऽल्पबुद्धिः सविवेकासामर्थ्याद् (योगक्षेमनिमित्तं)
शरीराद्युपचयरक्षणनिमित्तम् इत्य् एतत् (प्रेयः) पशुपुत्रादि-
लक्षणं (वृणीते)। (स त्वम्) पुनः पुनर् मया प्रलोभ्यमा-
नो ऽपि (प्रियान्) पुत्रादीन् (प्रियरूपांश् चा) ’प्सरःप्रभृति-
लक्षणान् (कामान् अभिध्यायंस्) चिन्तयन् तेषाम् अनित्यत्वा-
सारत्वादिदोषान् हे (नचिकेतो ऽत्यस्राक्षीः) अतिसृष्टवान्
परित्यक्तवान् असि अहो बुद्धिमत्ता तव (नै ’ताम् अवाप्तवान्)
असि (सृङ्कां) सृतिं कुत्सिताम् मूढजनप्रवृत्तां (वित्तमयीं)
धनप्रायां (यस्यां) सृतौ (मज्जन्ति) सीदन्ति (बहवो)
ऽनेके मूढा (मनुष्याः)। तयोः श्रेय आददानस्य साधु भवति
हीयते ऽर्थाद् य उ प्रेयो वृणीते इत्य् उक्तं तत् कस्माद् इत्य् अत
आह। यतो (दूरं) दूरेण महतान्तरेण (एते विपरीते)
अन्योन्यव्यावृत्तरूपे विवेकाविवेकात्मकत्वात् तमःप्रकाशाव् इव

भाष्यम्.

(विषूची) विषूच्यौ नानागती भिन्नफले संसारमोक्षहेतुत्वेने 'त्य् एतत् । के ते इत्य् उच्यते (या चा 'विद्या) प्रेयोविषया (विद्ये 'ति) च श्रेयोविषया (ज्ञाता) निर्ज्ञाता 'वगता पण्डितैः । (विद्याभीप्सिनं) विद्यार्थिनं (नचिकेतसं) त्वाम् अहम् (मन्ये) कस्माद् यस्माद् अविद्वद्बुद्धिप्रलोभिनः (कामा) अप्सरःप्रभृतयो (बहवो) ऽपि (त्वा) त्वां (ना 'लोलुपन्त) न विच्छेदं कृतवन्तः श्रेयोमार्गाद् आत्मोपभोगाभिवाञ्छासम्पादनेन अतो विद्यार्थिनं श्रेयोभाजनम् मन्ये इत्य् अभिप्रायः । ये तु संसारभाजिनः (अविद्यायाम् अन्तरे) मध्ये घनीभूते इव तमसि (वर्तमाणाः) वेष्टमानाः पुत्रपश्वादितृष्णापाशशतैः (स्वयं धीराः) प्रज्ञावन्तः (पण्डिताः) शास्त्रकुशलाश् चे 'ति (मन्यमानास्) ते (दन्द्रम्यमाणा) अत्यर्थं कुटिलाम् अनेकरूपां गतिं गच्छन्तो जरामरणरोगादिदुःखैः (परियन्ति) परिगच्छन्ति (मूढाः) अविवेकिनो (ऽन्धेने 'व) दृष्टिविहीनेने 'व (नीयमाना) विषमे पथि (यथा) बहवो (ऽन्धा) महान्तम् अनर्थम् ऋच्छन्ति तद्वत् । अत एव मूढत्वान् (न साम्परायः) सम्परायः परलोकः तत्प्राप्तिप्रयोजनः साधनविशेषः शास्त्रीयः साम्परायः स च (बालम्) अविवेकिनम् प्रति न (प्रतिभाति) न प्रकाशते नो 'पतिष्ठते इत्य् एतत् (प्रमाद्यन्तम्) प्रमादं कुर्वन्तम् पुत्रपश्वादिप्रयोजनेषु आसक्तमनसं तथा (वित्तमोहेन) वित्तनिमित्तेन अविवेकिन

भाष्यम्.

(मूढं) तमसाच्छन्नं सन्तम् । (अयम्) एव (लोको) यो ऽयं दृश्यमानः स्त्र्यन्नपानादिविशिष्टः (ना ऽस्ति परो) ऽदृष्टो लोक (इत्य्) एवम् मननशीलो (मानी पुनः पुनर्) जनित्वा (वशम्) अधीनताम् (आपद्यते मे) मृत्योर् मम जननमरणादिलक्षणदुःखप्रबन्धारूढ एव भवती ऽत्य् अर्थः । प्रायेण ह्य् एवंविध एव लोकः । यस् तु श्रेयोऽर्थी सहस्रेषु कश्चिद् एवा ऽऽत्मविद् भवति त्वद्विधः । यस्माच् (छ्रवणाया ऽपि) श्रवणार्थं श्रोतुम् अपि (यो न लभ्यः) आत्मा (बहुभिर्) अनेकैः (शृण्वन्तो ऽपि बहवो) ऽनेके अन्ये (यं) आत्मानं (न विद्युः) न विदन्ति अभागिनो ऽसंस्कृतात्मनो न विजानीयुः । किं च (अस्य वक्ता) ऽप्य् (आश्चर्यो) ऽद्भुतवद् एव अनेकेषु कश्चिद् एव भवति तथा श्रुत्वा ऽप्य् (अस्य) ऽऽत्मनः (कुशलो) निपुण एवा ऽनेकेषु (लब्धा) कश्चिद् एव भवति यस्माद् (आश्चर्यो ज्ञाता) कश्चिद् एव (कुशलानुशिष्टः) कुशलेन निपुणेना ऽऽचार्येणा ऽनुशिष्टः संशिक्षितः सन् । कस्मान् (न) हि (नरेण) मनुष्येण अवरप्रोक्तो (ऽवरेण) हीनेन प्राकृतबुद्धिना इत्य् एतत् (प्रोक्त एष) आत्मा ऽयं त्वम् माम् पृच्छसि न हि (सुविज्ञेयः) सुष्ठु सम्यग् विज्ञेयो विज्ञातुं शक्यः यस्माद् (बहुधा) अस्ति ना ऽस्ति कर्ता ऽकर्ता शुद्धो ऽशुद्ध इत्याद्य् अनेकधा (चिन्त्यमानो) वादिभिः । कथम् पुनः सुविज्ञेय इत्य् उच्यते । (अनन्यप्रोक्ते) अनन्येना ऽपृथग्दर्शिना ऽऽचार्येण

भाष्यम्.

प्रतिपाद्यब्रह्मात्मभूतेन प्रोक्ते उक्ते आत्मनि (गतिः) अनेकधा अस्ति ना ऽस्ती ऽत्यादिलक्षणा चिन्ता गतिः (अत्र) अस्मिन् आत्मनि (ना ऽस्ति) न विद्यते सर्वविकल्पगतिप्रत्यस्तमितत्वाद् आत्मनः अथ वा स्वात्मभूते ऽनन्यस्मिन् आत्मनि प्रोक्ते (अनन्यप्रोक्ते अत्र गतिर्) अन्यस्या ऽवगतिर् (ना ऽस्ति) ज्ञेयस्या ऽन्यस्या ऽभावात् । ज्ञानस्य ह्य् एषा निष्ठा यद् आत्मैकत्वविज्ञानम् । अतो ऽवगन्तव्याभावान् न गतिर् अत्रा ऽवशिष्यते । संसारगतिर् वा ऽत्र ना ऽस्त्य् अनन्य आत्मनि प्रोक्ते ना ऽन्तरीयकत्वात् तद्विज्ञानफलस्य मोक्षस्य । अथ वा प्रोच्यमानब्रह्मात्मभूतेना ऽऽचार्येण प्रोक्ते आत्मनि अगतिर् अनवबोधो ऽपरिज्ञानम् अत्र ना ऽस्ति भवत्य् एवा ऽवगतिस् तद्विषया श्रोतुः तदनन्यो ऽहम् इत्य् आचार्यस्ये ऽवे ऽत्य् अर्थः । एवं सुविज्ञेय आत्मा आगमवता ऽऽचार्येणा ऽनन्यतया प्रोक्तः इतरथा (अणीयान्) अणुतरः (अणु प्रमाणाद्) अपि सम्पद्यते आत्मा (अतर्क्यम्) अतर्क्यः स्वबुद्ध्यभ्यूहेन केवलेन (तर्केण) तर्क्यमाणे अणुपरिमाणे केनचित् स्थापिते आत्मनि ततो ऽणुतरम् अन्यो ऽभ्यूहति ततो ऽप्य् अन्यो ऽणुतमम् इति । न हि तर्कस्य निष्ठा क्वचिद् विद्यते अतो ऽनन्यप्रोक्ते आत्मन्य् उत्पन्ना ये ऽयम् आगमप्रतिपाद्यात्ममतिर् (नै ऽषा तर्केण) स्वबुद्ध्यभ्यूहमात्रेण

भाष्यम्.

(आपनेया) न प्रापणीये ऽत्य् अर्थः ना ऽपनेतव्या वा न हन्तव्या तार्किको ह्य् अनागमज्ञः स्वबुद्धिपरिकल्पितं यत् किंचिद् एव कल्पयति अत एव च ये ऽयम् आगमप्रभूता (मतिर्) अन्येनै ऽवा ऽऽगमाभिज्ञेना ऽऽचार्येणै ऽव तार्किकात् (प्रोक्ता) मती (सुज्ञानाय) भवति हे (प्रेष्ठ) प्रियतम । का पुनः सा तर्कागम्या मतिर् इति उच्यते (यां त्वम्) मतिम् मद्वरप्रदानेन (आपः) प्राप्तवान् असि । सत्या ऽवितथविषया धृतिः यस्य तव सत्वं (सत्यधृतिः बता ऽसि) इत्य् अनुकम्पयन् आह मृत्युर् नचिकेतसं वक्ष्यमाणविज्ञानस्तुतये (त्वादृक्) त्वत्तुल्यो (नो) अस्मभ्यम् (भूयाद्) भवताद् अन्यः पुत्रः शिष्यो वा (प्रष्टा) कीदृक् यादृक् त्वं हे (नचिकेतः) प्रष्टः । पुनर् अपि तुष्ट आह । (जानाम्य् अहं शेवधिर्) निधिः कर्मफललक्षणो निधिर् इव प्रार्थ्यते (इति) असाव् (अनित्यम्) अनित्य इति जानामि (न हि) यस्माद् अनित्यैर् (अध्रुवैर्) नित्यं (ध्रुवं तत् प्राप्यते) परमात्माख्यः शेवधिः यस् त्व् अनित्यः सुखात्मकः शेवधिः स एवा ऽनित्यैर् द्रव्यैः प्राप्यते हि यतस् (ततस्) तस्मान् (मया) जानता ऽपि नित्यम् अनित्यसाधनैर् न प्राप्यते इति (नाचिकेतश् चितो ऽग्निर् अनित्यैर् द्रव्यैः) पश्वादिभिः स्वर्गसुखसाधनभूतो ऽग्निर् निर्वर्तित इत्य् अर्थः । तेना ऽहम् अधिकारापन्नो ऽनित्यं याम्यं स्थानं स्वर्गाख्यं (नित्यम्) आपेक्षिकम् (प्राप्तवान्)

(अस्मि) । त्वं तु (कामस्याऽऽप्तिं) समाप्तिम् अत्र हि सर्वे कामाः परिसमाप्ताः (जगतः) साध्यात्माधिभूताधिदैवादेः (प्रतिष्ठाम्) आश्रयं सर्वात्मकत्वात् (क्रतोः) फलं हैरण्यगर्भम् पदम् (अनन्त्यम्) आनन्त्यम् (अभयस्य) च (पारम्) परां निष्ठां स्तोमं स्तुत्यम् महद् अणिमाद्यैश्वर्याद्यनेकगुणसंहतं स्तोमं च तत् महच् च निरतिशयत्वात् (स्तोममहद्) (उरुगायं) विस्तीर्णगतिम् (प्रतिष्ठां) स्थितिम् आत्मनोऽनुत्तमाम् अपि (दृष्ट्वा धृत्या) धैर्येण (धीरो) धीमान् सन् हे (नचिकेतः अत्यस्राक्षीः) परम् एवाऽऽकाङ्क्षन् अतिसृष्टवान् असि सर्वम् एतत् संसारभोगजातम् अहोवताऽनुत्तमगुणोऽसि त्वं यं ज्ञातुम् इच्छसि आत्मानं (तं दुर्दर्शं) दुःखेन दर्शनम् अस्येऽति दुर्दर्शोऽतिसूक्ष्मत्वात् तं यतो (गूढं) गहनम् (अनुप्रविष्टम्) प्राकृतविषयविकारैः प्रच्छन्नम् इत्य् एतत् । (गुहाहितं) गुहायाम् बुद्धौ आहितं स्थितं तत्रोऽपलभ्यत्वात् । (गह्वरेष्ठं) गह्वरे स्थाने विषमे अनेकानर्थसङ्कटे तिष्ठतीऽति गह्वरेष्ठम् । यत एवं गूढम् अनुप्रविष्टो गुहाहितम् च अतो गह्वरेष्ठः अतो दुर्दर्शः तम् (पुराणम्) पुरातनम् । (अध्यात्मयोगाधिगमेन) विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानम् अध्यात्मयोगः तस्य अधिगमः तेन (मत्वा देवम्) आत्मानं (धीरो हर्षशोकौ) आत्मन उत्कर्षापकर्षयोर् अभावात् (जहाति) । किं च एतद् आत्मतत्त्वं यद्

भाष्यम्.

(कुतश्चित्) कारणान्तराद् बभूव अस्माच् चा’’त्मनो (न बभूव कश्चिद्) अर्थान्तरभूतः अतो ऽयम् आत्मा (अजः नित्यः शाश्वतः) अपक्षयविवर्जितः। यो ह्य् अशाश्वतः सो’पक्षीयते (अयं) तु शाश्वतः अत एव (पुराणः) पुरा’पि नव एवे’ति यो ह्य् अवयवोपचयद्वारेण’भिनिर्वर्त्यते स इदानीं नवो यथा कुम्भादिः तद्विपरीतस् त्व् आत्मा पुराणो वृद्धिविवर्जितः इत्य् अर्थः। यत एवम् अतो (न हन्यते) न हिंस्यते (हन्यमाने) शस्त्रादिभिः (शरीरे) तत्स्थो ऽप्य् आकाशवद् एव। एवम्भूतम् अप्य् आत्मानं शरीरमात्रात्मदृष्टिर् (हन्ता चेद्) यदि (मन्यते) चिन्तयति (हन्तुं) हनिष्याम्य् एनम् इति। यो ऽप्य् अन्यो (हतः) सो ऽपि (चेन् मन्यते हतम्) आत्मानं हतो ऽहम् इति (उभाव्) अपि (तौ न विजानीतः) स्वम् आत्मानं यतो (ना’यं हन्ति) अविक्रियत्वाद् आत्मनः तथा (न हन्यते) आकाशवद् एवा’विक्रियत्वाद् एव अतो ऽनात्मज्ञविषय एव धर्माधर्मादिलक्षणः संसारो न ब्रह्मज्ञस्य श्रुतिप्रामाण्यात् न्यायाच् च धर्माधर्माद्यनुपपत्तेः। कथम् पुनर् आत्मानं जानाती’त्य् उच्यते। (अणोः) सूक्ष्माद् (अणीयान्) श्यामाकादेर् अणुतरः (महतो) महत् पारिमाणान् (महीयान्) महत्तरः पृथिव्यादेर् अणु महद् वा यद् अस्ति लोके वस्तु तत् तेने’वा’’त्मना नित्येना’’त्मवत् सम्भवति तद् आत्मना विनिर्मुक्तम् असत् सम्पद्यते। तस्माद् असाव् एवा’’त्मा अणोर् अणीयान् महतो महीयान्

सर्वनामरूपवस्तूपाधिकत्वात् । स चा (’’त्मा’ स्य जन्तोर्) ब्रह्मादिस्तम्बपर्यन्तस्य प्राणिजातस्य (गुहायां) हृदये (निहितः) आत्मभूतः स्थित इत्य् अर्थः । (तम्) आत्मानं दर्शनश्रवणमननविज्ञानलिङ्गम् (अक्रतुर्) अकामो दृष्टादृष्टवाह्यविषयोपरतबुद्धिर् इत्य् अर्थः । यदा च एवं तदा मनआदीनि करणानि (धातवः) शरीरस्य धारणात् प्रसीदन्ती’त्य् एषां धातूनाम् (प्रसादाद् आत्मनो महिमानं) कर्मनिमित्तवृद्धिक्षयरहितम् (पश्यति) अयम् अहम् अस्मी’ति साक्षाद् विजानाति ततो (विगतशोको) भवति । अन्यथा दुर्विज्ञेयो ऽयम् आत्मा कामिभिः प्राकृतपुरुषैर् इत्य् आह । यस्माद् (आसीनो) ऽवस्थितो ऽचल एव सन् (दूरं व्रजति शयानो याति सर्वतः) एवम् असाव् आत्मा देवो मदामदः समदो ऽमदश् च सहर्षो ऽहर्षश् च विरुद्धधर्मवान् अतो ऽशक्यत्वात् ज्ञातुं (कस् तम् मदामदं देवम् मदन्यो ज्ञातुम् अर्हति) अस्मदादेर् एव सूक्ष्मबुद्धेः पण्डितस्य सुविज्ञेयो ऽयम् आत्मा । स्थितिगतिनित्यादिविरुद्धानेकधर्मोपाधिकत्वाद् विरुद्धधर्मत्वाद् विश्वरूप इव चिन्तामणिवद् अवभासते अतो दुर्विज्ञेयत्वं दर्शयति कस् तम् मदन्यो ज्ञातुम् अर्हती’ति । करणानाम् उपशमः शयनं करणजनितस्यै’कदेशविज्ञानस्यो’पशमः शयानस्य भवति तदा चै’वं केवलसामान्यविज्ञानत्वात् सर्वतो याती’व यदा विशेषविज्ञानस्थः स्वेन रूपेण स्थित एव सन् मनआदिगतिषु तदुपाधिकत्वाद् दूरं व्रजती’व

स चे 'हे 'व वर्तते । तद्विज्ञानाच् च शोकात्यय इत्य् अभि-
दर्शयति । (अशरीरं) स्वेन रूपेणा ''काशकल्पः आत्मा तम्
अशरीरं (शरीरेषु) देवपितृमनुष्यादिशरीरेषु (अनवस्थेषु) अवस्थि-
तिरहितेषु (अवस्थितं) नित्यम् अविकृतम् इत्य् एतत् (महान्तम्)
महत्त्वस्या 'पेक्षिकत्वशङ्कायाम् आह (विभुं) व्यापिनम् (आत्मानम्)
आत्मग्रहणं स्वतो ऽनन्यत्वप्रदर्शनार्थम् । आत्मशब्दः प्रत्यगात्म-
विषय एव मुख्यः तम् ईदृशम् आत्मानम् (मत्वा) अयम् अहम्
इति (धीरो) धीमान् (न शोचति) । न ह्य् एवंविधस्य आत्मविदः
शोकोपपत्तिः । यद्य् अपि दुर्विज्ञेयो ऽयम् आत्मा तथा 'प्य् उपायेन
सुविज्ञेय एवे 'त्य् आह । (ना 'यम् आत्मा प्रवचनेन) 'नेकवेद-
स्वीकरणेन (लभ्यो) ज्ञेयः । (ना) 'पि (मेधया) ग्रन्थार्थधारण-
शक्त्या । (न बहुना श्रुतेन) केवलेन । केन तर्हि लभ्य इति
उच्यते । (यम् एव) स्वम् आत्मानम् (एष) साधको (वृणुते)
प्रार्थयते (तेनै) 'वा ''त्मना वरित्रा स्वयम् आत्मा (लभ्यो) ज्ञेय
इत्य् अर्थः । कथं लभ्य इत्य् उच्यते । (तस्या) ''त्मकामस्यै
('ष आत्मा विवृणुते) प्रकाशयति पारमार्थिकीं (स्वां तनुं)
स्वकीयां स्वं याथात्म्यम् इत्य् अर्थः । किं चा 'न्यत् । (न दुश्च-
रितात्) प्रतिषिद्धात् श्रुतिस्मृत्यविहितात् पापकर्मणो (ऽवि-
रतो) ऽनुपरतः ना 'पि इन्द्रियलौल्याद् (अशान्तो) ऽनुपरतः
(ना) 'पि (असमाहितो) ऽनेकाग्रमनाविक्षिप्तचित्तः समाहितचित्तो

भाष्यम् .

ऽपि सन् समाधानफलार्थित्वान् ना ऽप्य् (अशान्तमानसो) ऽव्यापृतचित्तः । केन प्राप्नुयाद् इति उच्यते । (प्रज्ञानेन) ब्रह्मविज्ञानेन (एनम्) प्रकृतम् आत्मानम् (आप्नुयात्) । यस् तु दुश्चरिताद् विरतः इन्द्रियलौल्याच् च समाहितचित्तः समाधानफलाद् अप्य् उपशान्तमानसश् चा ऽऽचार्यवान् प्रज्ञानेन यथोक्तम् आत्मानम् प्राप्नोति इत्य् अर्थः । यस् त्व् अनेवम्भूतो (यस्या) ऽऽत्मनो (ब्रह्मक्षत्त्रे) सर्वधर्मविधारके अपि सर्वत्राणभूते (उभे ओदनम्) अशनम् (भवतः) स्याताम् । सर्वहरो ऽपि (मृत्युर् यस्यो ऽपसेचनम्) एव ओदनस्यो ऽपसेचनत्वे ऽप्य् अपर्याप्तः तम् प्राकृतबुद्धिर् यथोक्तसाधनरहितः सन् (क इत्था) इत्थम् एवं यथोक्तसाधनवान् इवे ऽत्य् अर्थः (वेद) विजानाति । (यत्र स) आत्मे ऽति ॥

॥ इति द्वितीयवल्लीभाष्यम् ॥

ऋतम् पिवन्ताव् इत्य् अस्या वल्याः सम्बन्धः । विद्याविद्ये नानाविरुद्धफले इत्य् उपन्यस्ते न तु सफले ते यथावन् निर्णीते तन्निर्णयार्थारथरूपककल्पना । तथा च प्रतिपत्ति-

सौकर्यम् एवं च प्राप्तृप्राप्यगन्तृगन्तव्यविवेकार्थं द्वाव् आत्मानाव् उपन्यस्येते । (ऋतं) सत्यम् अवश्यम् भावित्वात् कर्मफलम् (पिवन्तौ) एकस् तत्र कर्मफलम् पिवति भुङ्क्ते नेऽतरस् तथापि पातृसम्बन्धात् पिवन्ताव् इत्य् उच्यते छत्रिन्यायेन (स्वकृतस्य) स्वयंकृतस्य कर्मण ऋतम् इति पूर्वेण सम्बन्धः । (लोके) ऽस्मिन् शरीरे (गुहां) गुहायाम् बुद्धौ (प्रविष्टौ परमे) बाह्यपुरुषाकाशसंस्थानापेक्षया परमम् । परस्य च ब्रह्मणो ऽर्द्धं स्थानम् परार्द्धं तस्मिन् हि परम् ब्रह्मो ऽपलभ्यते । तस्मिन् परमे (परार्द्धे) हार्दाकाशे प्रविष्टाव् इत्य् अर्थः । तौ च (छायातपाव्) इव विलक्षणौ संसारित्वासंसारित्वेन (ब्रह्मविदो वदन्ति) कथयन्ति । न केवलम् अकर्मिण एव वदन्ति (पञ्चाग्नयो) गृहस्थाः (ये च त्रिणाचिकेताः) त्रिःकृत्वो नाचिकेतो ऽग्निश् चितो यैस् ते त्रिणाचिकेताः । (यः सेतुः) सेतुर् इव (ईजानानां) यजमानानां कर्मिणां दुःखसन्तरणार्थत्वान् नाचिकेतो ऽग्निस् तं वयं ज्ञातुं चेतुं च (शकेमहि) शक्नुवन्तः । किं च (अभयम्) भयशून्यं संसारपारं (तितीर्षतां) तर्तुम् इच्छताम् ब्रह्मविदां (यत् परम्) आश्रयम् (अक्षरम्) आत्माख्यम् (ब्रह्म) तच् च ज्ञातुं शकेमहि परापरे ब्रह्मणी कर्मिब्रह्मविदाश्रये वेदितव्ये इति वाक्यार्थः । तयोर् एव ह्य् उपन्यासः

कृतः ऋतम् पिबन्ताव् इति । तत्र य उपाधिकृतः संसारी विद्याविद्ययोर् अधिकृतो मोक्षगमनाय संसारगमनाय च तस्य तदुभयगमने साधनो रथः कल्प्यते । तत्रा (ऽऽत्मानम्) ऋतपं संसारिणं (रथिनं) रथस्वामिनं (विद्धि) जानीहि । (शरीरं रथम् एव तु) । रथबद्धहयस्थानीयैर् इन्द्रियैर् आकृष्यमाणत्वाच् छरीरस्य (बुद्धिं तु) अध्यवसायलक्षणां (सारथिं विद्धि) बुद्धिनेतृप्रधानत्वाच् छरीरस्य सारथिनेतृप्रधान इव रथः । सर्वं हि देहगतं कार्यम् बुद्धिकर्तव्यम् एव प्रायेण (मनः) सङ्कल्पविकल्पादिलक्षणम् (प्रग्रहं) रशनां विद्धि । मनसा हि गृहीतानि श्रोत्रादीनि करणानि प्रवर्तन्ते रशनये ऽवा ऽश्वाः (इन्द्रियाणि) चक्षुरादीनि (हयान् आहुः) रथकल्पनाकुशलाः शरीररथाकर्षणसामान्यात् । (तेषु) एवे ऽन्द्रियेषु हयत्वेन परिकल्पितेषु (गोचरान्) मार्गान् रूपादीन् (विषयान्) विद्धि । (आत्मेन्द्रियमनोयुक्तं) शरीरेन्द्रियमनोभिः सहितं संयुक्तम् आत्मानम् (भोक्ते ऽति) संसारी ऽति (आहुर् मनीषिणः) विवेकिनः न हि केवलस्या ऽऽत्मनो भोक्तृत्वम् अस्ति बुद्ध्याद्युपाधिकृतम् एव तस्य भोक्तृत्वं तथा च श्रुत्यन्तरं केवलस्या ऽभोक्तृत्वम् एव दर्शयति । ध्यायती ऽव लेलायती ऽवे ऽत्यादि । एवं च सति वक्ष्यमाणस्य रथकल्पनया वैष्णवस्य पदस्य आत्मतया प्रतिपत्तिर् उपपद्यते न अन्यथा स्वभावानतिक्रमात् । तत्रै ऽवं सति (यस् तु) बुद्ध्याख्यः सारथिर्

भाष्यम् .

(अविज्ञानवान्) अनिपुणः अविवेकी प्रवृत्तौ च निवृत्तौ च (भवति) यथे’तरो रथचर्यायाम् (अयुक्तेना) ’प्रगृहीतेना ’समाहितेन (मनसा) प्रग्रहस्थानीयेन (सदा) ’युक्तो भवति तस्या ’कुशलस्य बुद्धिसारथेर् (इन्द्रियाण्य्) अश्वस्थानीयानि (अवश्यानि) अशक्यनिवारणानि (दुष्टाश्वा) अदान्ताश्वा (इवे’तर-सारथेर्) भवन्ति। (यस् तु) पुनः पूर्वोक्तविपरीतसारथिर् (भवति विज्ञानवान्) निपुणः विवेकवान् (युक्तेन मनसा) प्रगृहीतमनाः समाहितचित्तः (सदा तस्या) ’श्वस्थानीयानी (’न्द्रियाणि) प्रवर्त-यितुं निवर्तयितुं वा शक्यानि (वश्यानि) दान्ताः (सदश्वा इवे ’तरसारथेः)। तत्र पूर्वोक्तस्या ’विज्ञानवतो बुद्धिसारथेर् इदम् फलम् आह। (यस् त्व् अविज्ञानवान् भवति अमनस्कः) अप्रगृ-हीतमनस्कः (स) तत एवा (’शुचिः सदे) ’व सारथी (न तत्) पूर्वोक्तम् अक्षरम् ब्रह्म यत् परम् (पदम् आप्नोति) तेन सारथि-ना। नकेवलं तन् ना’’प्नोति (संसारं च) जन्ममरणलक्षणम् (अधिगच्छति)। (यस् तु) द्वितीयो (विज्ञानवान्) विज्ञानवत् सारथ्युपेतो रथी विद्वान् इत्य् एतद् युक्तमनाः (समनस्कः स) तत एव (सदा शुचिः) सन् (तत् पदम् आप्नोति यस्माद्) अप्राप्तात् पदात् प्रच्युतः सन् (भूयः) पुनर् (न जायते) संसारे। किं तत् पदम् इत्य् आह। (विज्ञानसारथिर् यस् तु) यो विवेकबुद्धिसा-रथिः पूर्वोक्तो (मनःप्रग्रहवान्) प्रगृहीतमनाः समाहितचित्तः

भाष्यम्.

सन् शुचिर् (नरो) विद्वान् (सो ऽध्वनः) संसारगतेः (पारम्) परम् एवा ऽधिगन्तव्यम् इत्य् एतद् (आप्नोति) मुच्यते सर्वसंसार-बन्धनैः (विष्णोर्) व्यापनशीलस्य ब्रह्मणः परमात्मनो वासुदे-वाख्यस्य (परमम्) प्रकृष्टम् (पदं) स्थानं स तद्ब्रह्म इत्य् एतत् तद्ब्रह्म अवाप्नोति विद्वान् । अधुना यत् पदं गन्तव्यं तस्ये ऽन्द्रि-याणि स्थूलान्य् आरभ्य सूक्ष्मतारतम्यक्रमेण प्रत्यगात्मतया ऽधि-गमः कर्तव्य इत्य् एवम् अर्थम् इदम् आरभते । स्थूलानि तावद् इन्द्रियाणि तानि येर् अर्थैः आत्मप्रकाशनाया ऽऽरब्धानि तेभ्य (इन्द्रियेभ्यः) स्वकार्येभ्यः ते (परा ह्य् अर्थाः) सूक्ष्मा महान्तश् च प्रत्यगात्मभूताश् च तेभ्यो ह्य् (अर्थेभ्यः परं) सूक्ष्मतरम् महत् प्रत्यगात्मभूतं च (मनः) मनःशब्दवाच्यम् मनस आरम्भकम् भूतसूक्ष्मं सङ्कल्पविकल्पाद्यारम्भकत्वात् (मनसो) ऽपि (परा) सूक्ष्मतरा महत्तरा प्रत्यगात्मभूता च (बुद्धिः) बुद्धिशब्दवाच्यम् अध्यवसायाद्यारम्भकम् भूतसूक्ष्मम् (बुद्धेर् आत्मा) सर्वप्राणि-बुद्धीनाम् प्रत्यगात्मभूतत्वाद् आत्मा (महान्) सर्वमहत्त्वाद् अव्यक्ताद् यत् प्रथमं जातं हैरण्यगर्भं तत्त्वम् बोधाबोधात्मकम् महान् आत्मा बुद्धेः (परः) इत्य् उच्यते । (महतो) ऽपि (परं) सूक्ष्मतरम् प्रत्यगात्मभूतं सर्वमहत्तरं चा (ऽव्यक्तं) सर्वस्य जग-तो बीजभूतम् अव्याकृतनामरूपसतत्त्वं सर्वकार्यकारणशक्ति-समाहाररूपम् अव्यक्ताव्याकृताकाशादिनामवाच्यम्

भाष्यम् ।

परमात्मन्य् ओतप्रोतभावेन समाश्रितं वटकणिकायाम् इव वटवृक्षशक्तिः । तस्माद् (अव्यक्तात् परः) सूक्ष्मतमः सर्वकारणकारणत्वात् प्रत्यगात्मत्वाच् च महांश् च अत एव (पुरुषः) सर्वपूरणात् । ततो ऽन्यस्य परस्य प्रसङ्गं निवारयन्न् आह । (पुरुषान् न परं किंचिद्) इति । यस्मान् ना ऽस्ति पुरुषाच् चिन्मात्रघनात् परं किंचिद् अपि वस्त्वन्तरं तस्मात् सूक्ष्मत्वमहत्त्वप्रत्यगात्मत्वानां (सा काष्ठा) निष्ठा पर्यवसानम् अत्र हि ऽन्द्रियेभ्य आरभ्य सूक्ष्मत्वादिपरिसमाप्तिः । अत एव च गन्तॄणां सर्वगतिमतां संसारिणाम् (परा) प्रकृष्टा (गतिः) यद् गत्वा न निवर्तन्त इति स्मृतेः । ननु गतिश् चेद् आगत्या ऽपि च भवितव्यं कथं यस्माद् भूयो न जायन इति । नै ऽष दोषः । सर्वस्य प्रत्यगात्मत्वाद् अवगतिर् एव गतिर् इत्य् उपचर्यते । प्रत्यगात्मत्वं च दर्शितम् इन्द्रियमनोबुद्धिपरत्वेन । यो हि गन्ता सो ऽगतम् प्रत्यग्रूपं गच्छत्य् अनात्मभूतं न विपर्ययेण । तथा च श्रुतिः । अनध्वगा अध्वसु पारयिष्णव इत्याद्या । तथा च दर्शयति प्रत्यगात्मत्वं सर्वस्य । (एष) पुरुषः (सर्वेषु) ब्रह्मादिस्तम्बपर्यन्तेषु (भूतेषु गूढः) संवृतो दर्शनश्रवणादिकर्माविद्यामायाच्छन्नो ऽत एवा (ऽऽत्मा न प्रकाशते) आत्मत्वेन कस्यचित् । अहो ऽतिगम्भीरा दुरवगाह्या विचित्रा माया चे ऽयं यद् अयं सर्वो जन्तुः परमार्थतः परमार्थसतत्त्वो ऽपि एवम् बोध्यमानो ऽहम् परमात्मे ऽति न गृह्णाति

भाष्यम्.

अनात्मानं देहेन्द्रियादिसङ्घातम् आत्मनो दृश्यमानम् अपि घटादिवद् अस्मन्नेना’हम् अमुष्य पुत्र इत्य् अनुच्यमानो ऽपि गृह्णाति नूनम् परस्यै’व मायया मोमुह्यमानः सर्वो लोको ऽयम् बम्भ्रमी’ति । तथा च स्मरणं । ना’हम् प्रकाशः सर्वस्य योगमायासमावृत इत्यादि । ननु विरुद्धम् इदम् उच्यते मत्वा धीरो न शोचति न प्रकाशत इति च । नै’तद् एवम् । असंस्कृतबुद्धेर् अविज्ञेयत्वात् न प्रकाशत इत्य् उक्तम् । (दृश्यते तु) संस्कृतया (’ग्र्यया) ’ग्रम् इवा’ग्र्यातया एकाग्रतयोपेतये’त्य् एतत् । (सूक्ष्मया) सूक्ष्मवस्तुनिरूपणपरया कैः (सूक्ष्मदर्शिभिः) इन्द्रियेभ्यः परा ह्य् अर्था इत्यादिप्रकारेण सूक्ष्मता पारम्पर्यदर्शनेन परं सूक्ष्मं द्रष्टुं शीलं येषां ते सूक्ष्मदर्शिनस् तैः सूक्ष्मदर्शिभिः पण्डितैर् इत्य् एतत् । तत्प्रतिपत्त्युपायम् आह । (यच्छेत्) नियच्छेद् उपसंहरेत् (प्राज्ञो) विवेकी । किं (वाक्) वाचं । वाग् अत्रो’पलक्षणार्था सर्वेन्द्रियाणां । क्व (मनसी) मनसि छान्दसन्दैर्घ्यं (तच्) च मनो (यच्छेत् ज्ञाने) प्रकाशस्वरूपे बुद्धाव् (आत्मनि) बुद्धिर् हि मनआदिकरणान्य् आप्नोति इति आत्मा प्रत्यक् तेषां (ज्ञानम्) बुद्धिम् (आत्मनि महति) प्रथमजे (नियच्छेत्) प्रथमजवत् स्वच्छस्वभावकम् आत्मनो विज्ञानम् आपादयेद् इत्य् अर्थः । (तं) च महान्तम् आत्मानं (यच्छेत् शान्ते) सर्वविशेषप्रत्यस्तमितरूपे अविक्रिये सर्वान्तरे सर्वबुद्धिप्रत्यक्-

भाष्यम् ।

साक्षिणि मुख्ये (आत्मनि)। एवम् पुरुषे आत्मनि सर्वम् प्रविलाप्य नामरूपकर्मत्रयं यन् मिथ्याज्ञानविजृम्भितं क्रियाकारकफललक्षणं स्वात्मयाथात्म्यज्ञानेन मरीच्युदकरज्जुसर्पगगणमलानी'व मरीचिरज्जुगगणस्वरूपदर्शनेनै'व स्वस्थः प्रशान्तः कृतकृत्यो भवति यतो ऽतस् तद्दर्शनार्थम् अनाद्यविद्याप्रसुप्ताः (उत्तिष्ठत) हे जन्तव: आत्मज्ञानाभिमुखा भवत (जाग्रत) अज्ञाननिद्रायाः घोररूपायाः सर्वानर्थबीजभूतायाः क्षयं कुरुत। कथम् (प्राप्य) उपगम्य (वरान्) प्रकृष्टान् आचार्यांस् तद्विदः तदुपदिष्टं सर्वान्तरम् आत्मानम् अहम् अस्मि इति (निबोधत) अवगच्छत न ह्य् उपेक्षितव्यम् इति श्रुतिर् अनुकम्पया ऽऽह मातृवद् अतिसूक्ष्मबुद्धिविषयत्वाद् विज्ञेयस्य। किम् इव सूक्ष्मबुद्धिर् इत्य् उच्यते। (क्षुरस्य धारा) ऽग्रं (निशिता) तीक्ष्णीकृता (दुरत्यया) दुःखेना ऽत्ययो यस्याः सा दुरत्यया यथा सा पद्भ्यां दुर्गमनीया तथा (दुर्गं) दुःसम्पाद्यम् इत्य् एतत् (पथः) पन्थानं तत्त्वज्ञानलक्षणम् मार्गं (कवयो) मेधाविनो (वदन्ति) ज्ञेयस्या ऽतिसूक्ष्मत्वात् तद्विषयस्य ज्ञानमार्गस्य दुःसम्पाद्यत्वं वदन्ती त्य् अभिप्रायः। तत् कथम् इति सूक्ष्मत्वं ज्ञेयस्ये त्य् उच्यते। स्थूला तावद् इयम् मेदिनी शब्दस्पर्शरूपरसगन्धोपचिता सर्वेन्द्रियविषयभूता तथा शरीरं तत्रै ऽकैकगुणापकर्षेण गन्धादीनां सूक्ष्मत्वमहत्त्वविशुद्धत्वनित्यत्वादितारतम्यं दृष्टम् अबादिषु यावद् आकाशम् इति ते गन्धादयः सर्व एव स्थूलत्वाद् विकाराः शब्दान्ता